Ab 39

॥अथकुंडसिद्धिटीकाप्रारंभः॥

॥पत्र १॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

॥श्रीगणेशायनमः॥मत्तमतंगजवदनंसादितविघ्नावलीसदनं॥गौरीहरयोःस्तोकंपालितस्तोकंहृदावंदे॥१॥कल्याणिवाणिनिजपाणिसरोजयुग्मंसंयोज्यदेविकरवाणितवप्रणामं॥मत्तेंडमंडलसदृसनांगणंतेनृत्यायनित्यमिदमस्तुरसानुसिंधुं॥२॥संतानकल्पतरुमंडपमंडितायांकुंडोल्लसज्ज्वलनकांचनवेदिकायां॥सीतायुहूहकराकलितैकपाणिर्वैवाहहोमसमयेदृशताछिवानि॥३॥कुंडमंडपसंसिद्धेर्विरचिंलिखितोक्षिषु॥प्राचीनवाक्यसंदर्भसंदर्शयितुमारभे॥४॥ ॥इहहिशिष्टग्रंथारंभेस्वेष्टदेवतानमस्कारादिरूपंमंगलमाचरंति॥तस्मान्माध्यंदिनीयोविघ्नलशमीस्वकृतकुंडसिद्धिंयाचिरव्यासुःस्वाभीष्टदेवतास्मरणरूपंमंगलमा चरति॥श्रा॥दूरविकीर्णितेन॥गाढध्वांतमनेकभानुनगरेराजत्कलाधारिणिगौरंचछफरीयुगंहरदलत्पद्मेणुहीरावलिं॥स्वर्णोत्तुंगगिरिद्वयाधरचरीनाकलिंदात्मजाकनकाद्युच्चमेरुपर्वतद्वयाधोगामिनीदीनाद्दशायमुनेयेतद्व्याजेनगौरीपृथुतुंगकुचयुगलतटांतरचारिरोमावलीवर्णनं॥यथाश्रुतेर्थेविचार्यमाणेऽसंबंधाद्भाश्चर्यमिति॥७॥ ॥अथस्वाख्यापूर्वकंग्रंथनामोपजातिछंदसाप्रतिजानीते॥कृष्णात्रिगोत्रेतितरांपवित्रे

पातुवः॥१॥स्मेरःसहासःशिवःवःयुष्मान्पातुरक्षतु॥किंकुर्वन्॥शिवांगौरीमितिवदन्॥इतीतिकिं॥हेगौरिद्दमाश्चर्यंपश्यकौतुकमवलोक्या॥आश्चर्यमेववर्णयति॥अनेकभानुनगरेअनेकसूर्योदरेगदंनिविडंध्वांतंअंधकारंपश्येत्येतन्निषेणगौरीमस्तकरत्नखचितस्वर्णमुकुटांतर्वर्तिनीलालकवर्णनं॥अन्यच्च॥एतत्कलाधारिणिविलसत्पूर्णचंद्रे॥श्रोत्रंचछफरीयुगंअतिचंचलंमीनद्वयमेतद्व्याजेनगौरीमुखचंद्रस्यचंचलनयनयुगलवर्णनं॥अन्यच्च॥दरदलत्पद्मेईषद्विकसत्कमलेश्रेणुहीरावलिःलघुवज्रपंक्तिः॥एतद्व्याजेनगौर्याईषद्हास्यवदनांतर्वर्तिदंतपंक्तिवर्णनं॥स्वर्णोत्तुंगगिरिद्वयाधरचरीनाकलिंदात्मजाकनकाद्युच्चमेरुपर्वतद्वयाधोगामिनीदीनादृशायमुनेयेतद्व्याजेनगौरीपृथुतुंगकुचयुगलतटांतरचारिरोमावलीवर्णनं॥यथाश्रुतेर्थेविचार्यमाणेऽसंबंधाद्भाश्चर्यमिति॥७॥ ॥अथस्वाख्यापूर्वकंग्रंथनामोपजातिछंदसाप्रतिजानीते॥कृष्णात्रिगोत्रेतितरांपवित्रे

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

पवित्रकर्मजनिवृत्तश्रमो॥तत्स्तुनाविहृतरीक्षितेनविरच्यतेमंडपकुंडसिद्धिः॥२॥स्पष्टोर्थः॥॥
अथकुंडमंडपादिविवक्षुस्तावद्धस्तादिपरिभाषांविपरीताख्यानिकानुष्टुभ्यामाह॥कृतोर्ध्वबा
होःसमभूगतस्यकर्तुःशरांशःप्रपदोछ्रितस्य॥योवासहस्तोस्यजिनांशकोपिस्यादंगुलंतन्नविभां
शकाये॥३॥यवोयूकाचलिक्षाचवालाग्रंचैवमादयः॥कृतमुष्टिःकरोरत्निररत्निरकनिष्ठिकः॥४॥
कृतःऊर्ध्वोबाहुर्येननथासमभुविसमपादतयास्थितस्यवाप्रपदंपादाग्रंतेनभुवमालंब्याङ्गु
तस्यकर्तुर्यजमानस्यथः पंचमांशः सहस्रः तस्ययोजिनांशकश्चतुर्विंशांशस्तदंगुलंतन्नविभां
शकानस्यतस्यश्रंगुलादेर्यैरंशाःअष्टमांशाःतेयवःयूकालिक्षावालाग्रंएवमादयोरथरेणु
प्रभृतयोभवंति।एतदुक्तंभवति।अंगुलस्याष्टमांशोयवःतस्याष्टमांशोयूकातस्याअष्टमांशो २
लिक्षातस्याअष्टमांशोवालाग्रंतदष्टमांशोरथरेणुस्तदष्टमांशस्त्रसरेणुस्तदंशःपरमाणुरिति।

कृतमुष्टियजमानहस्तःरत्निःसएकविंशत्यंगुलात्मकः।अकनिष्ठिकःमुक्तकनिष्ठःअरत्निःसमार्ध
द्वाविंशत्यंगुलात्मकोहस्तएव।अरत्निहस्तयोःप्रायःअभेदएवेतिज्ञाख्यायतत्कात्यायनः।यजमाने
नोर्ध्वबाहुनाप्रपदोछ्रितेसमस्थितेनवेति।तथापंचारत्निःपुरुषोदशपदोद्वादशांगुलंपदमिति॥
तथाविंशतिशतांगुलःपुरुषइति।अथसमवस्थितेनप्रपदोछ्रितेनवेत्ययंकात्यायनोक्तःश्रौतोवि
त्यः।यतःकल्पस्यसाक्षाच्छ्रुतिमूलकत्वात्।श्रुतिर्हैधंतुयत्रस्यात्तत्रधर्मावुभौस्मृताविति।समस्थितेनप्र
पदोछ्रितेनेत्येषकोविकल्पः।अथपंचरात्रादिषुआचार्यहस्तस्यकनिष्ठिकाद्येश्चतुर्भिरंगुलकै
र्महर्षे॥मध्यांगुलेर्मध्यमपर्वभागेतिर्यग्विसर्पद्भिरियंतुमेयेत्यत्रआचार्यमानमुपदिष्टं।तत्रापिआ
चार्यआचिनोतिअर्थान्कर्मफलरूपानितियास्कवाक्यबाहुल्यात्प्रयुक्तिबलात्।दानवाचनान्वा
रंभणवरवरणव्रतप्रमाणेषुयजमानंप्रतीयादितिकात्यायनवचनाच्चआचार्योयजमानएव॥

३

अथस्मार्तेस्मिन्कर्मणिकथंश्रौतवाक्यावसरइतिनशंक्यंयथाश्रौतेप्यग्निहोत्रादौसदोपवीतिनाभ
यंसदाबद्धशिखेनचेत्याद्यविरुद्धंस्मार्तमंगीक्रियतेनहुतस्मार्तेप्यस्मिन्कर्मणिश्रौतंग्राह्यमेवेति।
आदित्यपुराणे।जालांतरगतेभानोयत्सूक्ष्मंदृश्यतेरजः॥प्रथमंतत्प्रमाणानांत्रसरेणुंप्रचक्षते॥त्र
सरेणुस्तुविज्ञेयोयेषोस्युःपरमाणवः॥त्रसरेणवस्तेत्रयोरथरेणुस्तुसस्मृतः॥रथरेणवस्तेत्रयो
वालाग्रंतत्स्मृतंबुधैः॥वालाग्रा ण्यथलिक्षास्युस्तालिक्षाष्टकंस्मृतं॥अष्टौयूकायवंप्राहुरंगुलं
तुयवाष्टकं॥तच्चैवारत्निस्त्वंगुलपर्वाणिविज्ञेयान्येकविंशतिः॥अरत्निरकनिष्ठःस्याद्वितस्तिर्द्वादशां
गुलः॥अरत्निरेवहस्तःश्रुतावभिहितः॥अरत्निंप्रकृत्यचतुर्विंशत्यंगुलिभिर्मितेइति।अ
न्यदंगुलादिमानंतत्तत्कार्येषुद्रष्टव्यं॥४॥ ॥अथकुंडमंडपोपयोगीप्राचीसाधनंविवक्षुस्तदुपयो
गिनीमितिकर्तव्यतांस्रग्धरयाह॥ ॥ज्ञात्वापूर्वंधरित्रीं दहनखननसंस्कारनैःसंविशोध्यप ३

श्चात्कृत्वासमानांमुकुरजठरवत्स्वस्तिवाच्यद्विजेंद्रैः॥वाराहंकूर्मशेषौक्षितिमपिकुसुमाद्यैःसमाराध्य
शुद्धेवारेतिथ्यांचकुर्यात्सुरपतिकुकुभःसाधनंमंडपार्थं॥५॥पूर्वंप्रथमतोधरित्रीज्ञात्वाद्रव्यंधर्ममं
कुंडादिकर्तुंयोग्याऽयोग्यतिविचार्यततोदहनखननसंस्कारनादिभिःसंस्कृत्यैःशोधनोपायैश्चसंशो
ध्यतांगुणिजनेनबुध्यावामुकुरजठरवत्प्रादक्षिण्यादक्षवत्समांकृत्वाद्विजेंद्रैःब्राह्मणैःहृत्वास्वस्तिपु
ण्याहंवाचयित्वाकूर्मशेषौक्षितिंवराहंपुष्पादिभिःसमाराध्यपूजयित्वाशुद्धेदिनेतिथौचकारा दु
त्तरेमंडपार्थंसुरपतिकुकुभःप्राच्यांसाधनंकुर्यादितिव्याख्या॥यछारहातिलके॥नक्षत्रराशिवाराणा
मनुकूलेशुभेहनि॥ततोभूमितलेशुद्धेतुषांगारविवर्जिते॥पुण्याहवाचयित्वातुमंडपंरचयेद्बु
धमिति।भूपरीक्षापंचरात्रे॥तत्रभूमिंपरीक्षेतवास्तुज्ञानविशारदः॥स्फुटिताचसशल्याचवल्मी
कारोहणीतथा॥दूरंतःपरिवर्ज्याभूःकर्तुरायुर्धनापहा॥ईशकोणप्लवासाचकर्तुःश्रीदासुनिश्चि

नं॥पूर्वस्रवाद्दिकरीवरदानूत्तरस्रवा॥शेषकाष्ठास्रवाभूमिर्धर्धनायुर्ग्रहनाशिनी॥ब्राह्मणी घृत
गंधास्याक्षत्रियारसगंधवत्॥क्षारगंधाभवेद्वैश्याशूद्राविट्गंधिनीक्षितिः॥ब्राह्मणीभूः कुशो
पेताक्षत्रियाशरसंकुला॥कुशाकाशाकुलावैश्याशूद्रासर्वतृणाकुला॥अग्निविद्वायथा॥सितापीतात
थारक्ताकृष्णवर्णसमन्विता॥स्थिरोदकाद्दृढास्निग्धाभूमिःसर्वसुखावहा॥शीतस्पर्शोह्लकालेया
वद्धिस्पर्शाहिमागमे॥वर्षासुचोभयस्पर्शासाशुभापरिकीर्तिता॥हयग्रीवपंचरात्रे॥सुंदरीणांरति
र्यत्रपुरुषैःसहसत्तम॥काश्मीरचंदनामोदकर्पूरागरुगंधिनी॥कमलोत्पलगंधाचजातीचंपकगं
धिनी॥पाटलामल्लिकागंधानागकेसरगंधिनी॥दधिक्षीराज्यगंधाचमदिरासवगंधिनी॥सुगं
धाहीहिंगंधाचशुभगंधयुताचया॥सर्वेषामेववर्णानांभूमिःसाधारणीमता॥कुसुमप्रकरैर्व्याप्त
यस्यांनम्लानिमृच्छति॥ननिर्वांतितथादीप्तोयंत्रीघ्रंनजीर्यति॥मधुराचकषायाचाम्लाच ४

कटुकातथा॥कुशैःशरैस्तथाकाशैर्दूर्वाभिर्याचसंभरेति॥प्रयोगसारे॥वितस्तिमात्रविस्तारं
निर्मायविवरंभुवि॥निक्षिपेन्नामदस्तस्मिंस्तासुश्रिष्टासुशोभनं॥समासुमध्यमंविद्यान्न्यूना
स्वधममुच्यते॥परीक्ष्येवंप्रयत्नेनयत्नाभूमिंकनीयसीं॥अंगारतुषकेशादिहीनंकृत्वातुभूतलं॥
वासिच्यां॥खन्यमानेयदाकुंडेपाषाणःप्राप्यतेयदि॥तदायंमृत्यवेचास्तिकेशांगारेर्धनक्षयः॥
भस्मनाचभयंप्रोक्तंतुषैःप्रोक्तादरिर्ध्रुवं॥शल्यज्ञानंमहाकपिलपंचरात्रे॥प्रासादारंभकालेतु
यदंगस्पृशतेपुमान्॥वास्तुदेहेदृढंतत्रशल्यंविद्याद्विचक्षणः॥कंडूयतिशिरःपुंसिशिरःशल्यं
समुद्धरेत्॥शल्यंस्पृशंल्यंविनिर्दिशेत्॥साधहस्तेनसंनिष्ठेलक्षणंगदितंनव॥गोनाशोराजदंडश्च
सस्यहानिश्चजायते॥कुक्षौकंडूयमानेतुपाषाणंतत्रनिर्दिशेत्॥हस्तद्वितयमानेनलक्षणंकथि
तंनव॥भुजंगदंशस्तत्रस्यात्तस्माच्छल्यंसमुद्धरेत्॥जानूकंडूयमानेतुभस्मतत्रविनिर्दिशेत्॥

हस्तद्वयेनसंनिष्पेलुक्षणंगदितंतव॥अग्निदाहोमनस्तापःक्लेशादुःखभयानिच॥करोत्येवंविधंक
र्मनस्मान्नहैसमुद्धरेत्॥गोशृंगंपीतमंडूकःशंखःशुक्तिश्चकच्छपः॥शंबूकश्चप्रशस्ताःस्युर्याश्चा
न्यारत्ननातयः॥अंगारंवेतुषंकेशमस्थिशल्यंविचारयेदिति॥वास्तुदेहज्ञानंसोमशंभौ॥जानु
नीकूर्परांतेचदिशिवातदुताशयोः॥पेश्यांपादपुरोरोद्धाशिरोस्यहृदयेजलिरिति॥इदम भी
ष्टभूमौनवकोष्ठंचक्रंविधायद्रष्टव्यं॥भूमिशोधनेअन्येपिहादयःसंस्काराःस्मृत्युक्ताअनुसं
धेयाः॥विस्तरभयान्नात्रलिख्यंते॥हयशीर्षपंचरात्रे॥भूमिंतोयसमांकृत्वादर्पणोदरसंनिभां॥
नि॥तत्प्रकारस्तुअस्मन्ज्येष्ठपुत्रकृतः॥सुकाष्ठपट्टीचतुरंगुलोच्चोहस्तायतामंगुलविस्तृतांच॥
कृत्वांतरंकालघुलंबकोक्ताप्यतस्ततःपूरयसन्मृदंकुं॥मत्स्यपुराणे॥वाराहकूर्मशेषोचक्षितिं
चेवविधानतः॥पूजयेद्वास्तुकार्येषुविधिनासाधकोत्तमः॥इति॥५॥ ॥अथशंकुसमत्वसाधनं ५

स्थूलप्राचीसाधनंचउपजातिविपरीतारव्यानकीर्त्यामाह॥ ॥नृपांगुलेःसंमितसंमितकर्कटेनसू
त्रेणवावृत्तवरंविलिख्य॥रव्यंगुलंशंकुमुच्यमध्येनिवेशयेत्वांसमितांगुलाभिः॥ध्रुवतसृभि
श्चैवकरन्नतमाभिःसंस्पृश्यार्कचसमेधिकाभिः॥तछंकुभायत्रविशेदपेयाद्वृत्तेक्रमात्तावरुणेंद्र
काष्ठे॥७॥ ॥नृपांगुलेःषोडशांगुलेःपरिमितेनकर्कटेनसूत्रेणवावृत्तंविलिख्यतन्मध्येद्वादशांगुलं
शंकुंदृढंसूक्ष्माग्रंस्थापयेत्॥कोद्रशविंशत्यंगुलमिताभिःवतस्रभिर्करज्जुभिःसमानाभिःशला
काभिःकल्पितचतुर्दिग्गतवृत्तरेखास्थाभिःसंस्पृश्यमस्तकं॥एवंशंकुसमत्वंसाधयित्वातद्दशस्य
शंकोःछायापूर्वापरयत्रयस्मिन्प्रदेशेवृत्तेप्रविशतियत्रचभ्रपरार्द्धेवृत्ताद्बहिरपेयात्॥तत्रचिह्न
योःक्रमात्प्रतीचीप्राच्योभवतइतिव्याख्या॥तत्रसार्धश्लोकस्योपपत्तिः॥तत्रदोःकोट्योर्नाम
भेदोनस्वरूपभेदइति॥दोःकोटिवर्गयोगपदंकर्णइतिशंकुतलाद्धरेषांयावन्नीयमानंसूत्रंको

टिः।१६ शंकुर्भुजः।१२ एकत्रस्त्योगपदंकर्णः।२० वृत्तपरिधिस्पृष्टदिगंताङ्कयोर्यावन्नीयमानाश्च
तस्रःशलाकाःकर्णाभवंति॥शुल्वे॥समेशंकुनिरक्षयशंकुसंमितयारज्वामंडलंपरिलिख्ययत्रये
रक्षयोःशंकुच्छायानिपतंतितत्रशंकुंनिहंतिसाप्राचीति॥अत्रशंकुसंमितयैसुपलक्षणंतेनअ
धिकयापिरज्वावृत्तंकार्यं।अन्यथायत्राक्षभाषडंगुलातत्रधनुःसंक्रांतोद्वादशांगुलशंकोश्छायाप्र
विशस्तादृशोवृत्तेनस्यादेव।तस्मादस्माभिःषोडशांगुलसूत्रेणवृत्तंकारितं।तथावृत्तेवृत्तेलाघवंचाए
केनैववृत्तेनशंकुसमत्वसाधनंदिक्साधनंचसिध्यति।अतएवरामवाजपेयीशंकुमानाधिक्या
सदलेवृत्तेविरोधनइति॥एवंस्थूलंप्राचीसाधनंकृत्वासूक्ष्ममपिशालिन्याह॥॥कर्केकीटेगोमृगेय
कयासाह्यांचाल्यासिंहकुंभत्रिकेपि॥यांवैकाष्ठांभानुमान्यातितस्यांचाल्याद्वंद्वेकार्मुकेचालनंनो॥
॥८॥॥साप्राचीकर्कसंक्रांतोकीटेवृश्चिकसंक्रांतो गोवृषेमृगेमकरसंक्रांतो

एकयायूकयाचाल्यासूर्यस्यायनवशात्।उत्तरायनेउत्तरतःदक्षिणायनेदक्षिणतःएवंसिंहकुंभत्रिके।सिं
हकन्यातुलासंक्रांतोकुंभमीनमेषसंक्रांतोवाद्वाभ्यांयूकाभ्यांचालनीयाअयनवशात्।मिथुनधनुःसंक्रां
तोचालननास्तीतिव्याख्या॥अत्रवृत्तेभःसुसमीक्षतक्षितिगतेकेंद्रस्थशंकोःक्रमाद्ज्ञेयंयत्रविशस्यपे
तिचततस्तत्रापरेह्नोदिशेति।तत्कालायमजावयोस्तविवराभाकर्णमि हतालंबजात्रमितांगुलैरयनदि
शेयंईीस्फुटाचालितेतिसिद्धांतशिरोमणिमार्गेणेतिकर्तव्यंविधायद्रष्टव्यमितिः॥८॥ ॥एवंप्राचीसाधनं
कृत्वाथोत्तरदक्षिणयोःसाधनंआलिन्याह॥रज्जुंद्विघ्नांमध्यविद्धांसपार्श्वांप्राचीशंकौपश्चिमेचापिद
त्वा॥कर्षेद्दीमान्दक्षिणेचोत्तरेचतद्विद्धेस्याद्दक्षिणाचोत्तरादिक्॥९॥कुंडमंडपादेर्यावान्विस्तारस्तद्द्विगु
णांकृतमध्यांकांउभयोंतयोःपार्श्ववर्तीरज्जुंद्रष्ट्यासांतेप्राचीप्रतीच्योर्दत्तशंकोर्विन्यसेत्॥ततोमध्यां
केधृत्वारज्जुंदक्षिणेउत्तरेचकर्षेत्विद्धांकर्णाकेदक्षिणोत्तराचस्यादितिव्याख्या॥अत्रस्पष्टेयुक्ति
रिति॥९॥ ॥अथरात्रौदिक्साधनोपायंवसंतमालिक्रयाह॥निशिवाश्रवणोदयेदिगंद्वीगुरुभस्यो

दयनेथवाऽस्तमस्य॥सुरवार्धिक्रियावायुभांतरालेप्यमुनःसाधयपूर्ववच्चयाम्यां॥१०॥ ॥अथवारात्रेश्चव
णोदये प्राची॥अथवापुष्यस्योदयनेप्राची॥अथवाऽश्निकोदये प्राची॥अथवासुराणांवाईक्रिस्वष्टा
वायुश्चतयोर्भेचित्रास्वात्योर्नतयोरंतरालेप्राची॥अमुनःप्राचीनःपूर्ववत्पूर्वोक्तेनप थायाम्यांद
क्षिणांदिशांसाधयेदितियाख्या॥पुष्यश्चित्रास्वात्योर्यदंतरं॥एतस्याच्यादिशोरुपयुगमात्रोदितेः
पुरइति॥१०॥ ॥अथचित्रास्वात्योर्मध्येप्राचीयुक्तंनमध्यदृङ्नैयत्वानदुपायमनुष्टुभाह॥चि
त्रांविध्येकयास्वातिमन्ययापिशलाकया॥तिर्यक्स्थांतरचिक्रान्तुहिमूलेन्यास्फुटंइदिक्॥११॥
एकयाऋज्वशलाकयाचित्रांविध्वाअन्ययानातिदूरेयेवशलाकयास्वातींविध्यतयोःशलाकयो
र्मूलेएकीकृत्यतृतीयाशलाकामध्यांकांतदुभयसंपातंयावत्॥यत्रत्रलंबकोभूम्यांपतितोतत्रा
कयोःपूर्वापरसूत्रदानात्स्पष्टाप्राचीत्यत्रस्पष्टायुक्तिर्याख्याचेति॥११॥ ॥अथप्रकारांतरेण
लघूपायेनउदीचीसाधनमाह॥दिनमानदलेसप्तांगुलच्छायायतोहियत्॥शंकुमूलेनीयमान ७

सत्रंस्याद्दक्षिणोत्तरा॥१२॥तिथिपत्रात्गणिताद्दादिनमानमेतावदितिज्ञात्वाततोघटिकादिना
ज्ञातेदिनार्धमध्याङ्कैसप्तांगुलशंकोर्यत्रछायायंयत्रलगतितस्माच्छंकुमूलंयावन्नीयमानंस
त्रंदक्षिणोत्तरसूत्रमिति॥अथवासप्तांगुलशंकोर्गणितागतमध्याङ्ककछायातुल्यातस्यैवछा
यायदास्यात्तत्रयंशंकुमूलेनीयमानंसत्रंदक्षिणोत्तरेति॥अत्रयुक्तिस्तस्मिन्समयेरविर्दक्षिणो
त्तरवृत्तेभवतीति॥तत्पूर्ववत्पूर्वापरेसाध्ये॥१२॥ ॥एवंदिक्साधनंविपरीतारव्यानक्याह॥ ॥
दिगंतशंकुद्वयगंद्विपाशंविस्तारतुल्यंतुगुणंदलांके॥कोणेप्रकर्षेदितिवेदकोणेष्वेवंचतुःकोण
मतीवसाधु॥१३॥दिगंतयोःपूर्वदक्षिणयोःअपरोत्तरयोरुत्तरपूर्वयोःशंकुद्वयगंद्वौपाशौय
स्यतंविस्तारेणतुल्यंगुणंसूत्रंअर्धचिह्नेदृष्ट्वाकोणेआकर्षेत्॥एवंचतुर्ष्वपिकोणेषुइतिसू
त्रंसाधुचतुरस्रंस्यादिति॥१३॥ ॥अथमंडपेविशेषंशलाकान्याह॥उच्चांभ्रिमंडपस्यप्रकु
र्याद्धस्तोन्मानामर्धहस्तोन्मितांवा॥मध्येभ्रिमंडपेनोन्मितांचयष्टिंकुर्यान्मंडपश्चेद्वि

तीयः॥१४॥मंडपस्यभूमिंहस्तोछायामर्धहस्तोछायांवाकुर्यात्॥चेद्द्वितीयोमंडपःकार्योभवति।
तदामंडपप्रमाणपरिमितांभूमिंमध्येत्यक्त्वाद्वितीयंमंडपंकुर्यादितिव्याख्या।यत्सिध्दांतशे
खरे॥स्तंभात्कर्णगुलोछायंमंडपस्तंभलंबितं॥कपिलपंचरात्रेमंडपं प्रत्युक्तं।उछा
पोहस्तमानंस्यात्सुसमंचसुशोभनं।तेनविकल्पोयंज्ञेयः।वास्तुशास्त्रे॥मंडपांतरमुत्सृज्य
कर्तव्यंमंडपांतरमिति॥१४॥ ॥अथमंडपप्रमाणंवसंतमालिकयाह॥दशासूर्यकरोन्मितोऽ
धमःस्यादिनशक्रप्रमितैःकरैस्तुमध्यः॥धृतिभूपकरोन्मितोवरीयान्नरवहस्तोऽथमंडप
स्तुलायां॥१५॥दशाहादशहस्तोमंडपोधमःस्यात्।द्वादशचतुर्दशहस्तोमध्यःषोडशाष्टा
दशहस्तउत्तमः।तुलापुरुषदानेविंशतिहस्तोप्युत्तमः॥मंडपेश्रायामविस्तारौतुल्यावेवे
तिव्याख्या॥अत्रविस्तारायामयोरंगुलादिकंक्षिप्त्वात्यक्त्वावृषायसिध्यर्थंयतितव्यंउक्तं

विश्वकर्मणा॥वलिकुंभर्मेषुवेश्येषुमंडपेभोज्यवेश्मसु॥वृषंतुरंगशालायांगोशालागोकु
लेषुच॥पंचरात्रेपि॥कनीयान्दशहस्तःस्यान्मध्यमोद्वादशोन्मितः॥तथाषोडश भिर्हस्तैर्म
हत्तमःस्यादिहोत्तमः॥तथा॥दशाद्वादशहस्तोवद्विद्विरुध्यातताःक्रमात्॥लिंगपुराणे॥विंशद्धस्त
प्रमाणेनमंडपंकूटमेववा॥तथाषोडशहस्तेनकलाहस्तेनवापुनरिति।ननुद्वादशहस्तमंड
पस्यकथमधमत्वंमध्यमत्वंचेतिउच्यते।दशहस्तापेक्षयामध्यमत्वंचतुर्दशापेक्षयाकनि
ष्ठत्वं।यथाएकस्येवयज्ञमानस्यकुत्रचिद्गौणत्वंकुत्रचिन्मुख्यत्वंतद्वत्॥दशहस्तमंडपेनवकु
ड्डीपक्षेपंचमेखलापक्षेचआचार्याद्युपवेशनंनसंभवतीत्यत्रहस्त्यहस्त्येकहस्तपरिमितैकहस्त
कमेखलापक्षएवादरणीयश्रौचित्यात्॥अर्थात्परिमाणमितिकात्यायनोक्तेः॥उत्तमेपिमंड
पेदशहस्तकुंडनवकपंचमेखलादिकपक्षस्यसमावेशोनस्यादितिमंडपवृद्धिः कार्या।यतो

मंत्रमुक्तावल्याचतुर्विंशतिहस्तपर्यंतंमंडपवृद्धिः।वास्तुशास्त्रेतुपंचहस्तमारभ्य द्वात्रिंशद्धस्त
पर्यंतंवृद्धिः कर्मविशेषेउक्ता।साचात्रविस्तरभयान्नलिख्यतइति॥१५॥ ॥अथद्वारमानंवेदि
मानंचाख्यानिक्याह॥दिगंतरालेद्विकरंभवेद्बाश्चतुष्टयंवेदगजांगुलैस्तत्॥विवर्धितंमध्यव
रिष्टयोःस्याद्वेदीत्रिभागेनसमाकरोच्चा॥१६॥दिङ्मध्येद्वारचतुष्टयंद्विहस्तंभवति।तत्द्वारं
मध्यमोत्तमयोर्मंडपयोःचतुरष्टांगुलवृद्धिमत्।मध्येमंडपेचतुरंगुलावृद्धिःउत्तमेचाष्टांगु
लावृद्धिःकार्या॥वेदीमंडपस्यतृतीयांशेनमध्येकार्या॥मंडपेनवकोष्ठकेकृतेसतिमध्यको
ष्ठकार्या।समाहस्तमात्रमुच्चाकार्या।अत्रइष्टकाभिःकार्यत्येतत्केवलंसमत्वसाधनायेति
व्याख्या।पंचरात्रेकनिष्ठद्विकरंचतुरंगुलवृद्धितः।मध्यमोत्तमयोरिति।क्रियासारे।त्रिभाग
मंडपंकृत्वामध्यभागस्तुवेदिका॥हस्तमात्रंतदुत्सेधंचतुरस्रंसमंततः।वसिष्ठोपिहस्तो ९

नतांचविस्तीर्णामिति।मत्स्यपुराणादिषुयद्वेदिमानमन्यथातत्कर्मविशेषेज्ञेयं।सिद्धांतशेखरे
तुविशेषः।वेदीचतुर्विधाप्रोक्ताचतुरस्राचपद्मिनी।श्रीधरीसर्वतोभद्रेतिसुस्थापनादि
षु।चतुरस्राचतुःकोणा वेदीसर्वफलप्रदा।तडागादिप्रतिष्ठायांपद्मिनीपद्मसंनिभा।राज्ञास्य
सर्वतोभद्राचतुर्भद्राभिषेचने।विवाहेश्रीधरीदेवीविंशास्यसमन्विता।दर्पणोदरसंकाशा नि
म्नोन्नतविवर्जितेति॥१६॥ ॥अथतुलाप्रदानेविशेषमाह॥तुलाप्रदानेधममध्ययोःसास्यात्पंच
हस्तोत्तमकेद्विहस्ता॥ईशानभागेग्रहवेदिकापिहस्तोन्नितोच्छ्रायवतीत्रिवप्रा॥१७॥

७०

॥अथस्तंभनिवेशनंभुजंगप्रयातशालिनीभ्यामाह॥समत्रित्रिभागेचसूत्रंप्रदद्याद्दृग्दक्षिणं
चापिपूर्वापरंच॥ततस्त्रंशपूर्तौचकोणेषुदद्यात्समस्तंभकान्द्वादशैवेषुहस्तान्॥७॥वेद्याःको
णेहस्तिहस्तोच्चवेदस्तंभान्दद्याद्दिक्षुदिक्षुःसचूडान्॥प्रादक्षिण्यात्पंचमांशंतुभूमौदद्याद्वंधो
ऽत्रास्तंभसंस्था॥८॥समेतनीयेतनीयेपूर्वापरंदक्षिणोत्तरंचापिसूत्रंदद्यात्॥एवंनवकोष्ठा
त्मकोमंडपोभवति।ततस्तनीयांतेषुषट्सुचतुर्षुबहिःकोणेषुचसमान्स्तंभान्दृढान्यज्ञियवृक्षो
द्भवान्यंचहस्तप्रमाणान्द्वादशास्तंभान्दद्याद्धारयेत्।वेद्याःकोणेषुअष्टहस्तप्रमाणान्चतुरस्तंभा
सचूडान्तादृशानेवाग्नेयादिदिक्षुःप्रादक्षिण्याद्दध्याद्रोपयेत्।स्तंभपंचमांशंभूमौनिखनेद्वं
शूनेवोऽत्रास्तंभस्थापनंस्यादितिव्याख्या॥पंचरात्रे॥मंडपार्धोच्छ्रितान्वेदसंख्यान्चूडान्वि
तांस्तथा॥स्तंभान्समंचसंस्थाप्यस्तंभद्वादशकंपुनः॥इत्यत्रेप्युक्तप्रकारेणतत्रतत्रविभागतः॥

अत्रयद्यपिसाधारण्येनमंडपार्धोच्छ्रितानियषुस्तंभतथापिषोडशहस्तमंडपार्धेनैवेतिज्ञेयंसर्वमुरवस्यषोडशहस्तस्येवसर्वत्रोन्नत्वात्।यच्छारदातिलके॥षोडशस्तंभसंयुक्तंचतुरस्रेषुमध्यमाः॥अष्टहस्तसमुच्छ्रायाइतिवेदसंख्यानचूडान्वितांस्तथेतियाक्यात्चतुर्षुकोणगेषुस्तंभेषुचूडानियमः।अन्येषुद्वादशासुकर्णेवाचूडाकार्या।अन्यत्र।स्तंभोच्छ्रायेत्रिलाक्ष्यासस्त्रयोजनकोलके॥खननावटसंस्कारेप्रारंभोवह्निगोचरइति।वास्तुशास्त्रे॥पंचमांशंन्यसेद्भूमोसर्वसाधारणे स्तंभेषुतिर्यग्वलिकानिधेयाविधिरिति॥१८॥ ॥अथस्तंभोपरिकाष्ठनिवेशनमिंद्रवज्त्रयाह॥स्तंभेषुतिर्यग्वलिकानिधेयाचूडासुकर्णेषुथवावहिस्तः।पूर्वापरंदक्षिणसौम्यदिक्स्थंकोणेतृतीयंकाष्ठचयंनिदध्यात्॥१९॥प्रथमंचतुर्षुस्तंभेषुवेदिकोणगेषुवलिकाख्यंकाष्ठचतुष्टयंप्रांतेछिद्रवन्निधेयं॥तत्रपूर्वापरंद्वयंदक्षिणोत्तरंद्वयं ११

चचूडासुनिदध्यात्।तिर्यङ्निहितस्यकाष्ठस्यवलिकेतिसंज्ञा।एवंद्वादशास्वपिवास्तेषुस्तंभेषुकर्णेषुवाचूलिकासुवलिकाकाष्ठानिनिधेयानि।ततोमध्यस्तंभचूडातः पूर्वापरमेकंदक्षिणोत्तरमेकंकोणगंचैकंकाष्ठंसमतयास्थापयेदिति।एवंचतुर्थपिस्तंभेषुद्वादशकाष्ठानिसकर्णानिदेयानीतिव्याख्या॥१९॥ ॥अथमंडपाछादनंरथोद्धतयाह॥मध्यभागशिखरंरचयित्वाछादयेदपिकटैर्ऋजुवंशैः॥द्वारवर्जमिहमंडपमेनंस्तंभकान्पिसुवस्त्रसमूहैः॥२०॥वेदिस्तंभोपरिशिखराकारंरचनांकृत्वाएनंमंडपंद्वारवर्जितंकटैर्ऋजुवंशैश्चछादयेत्।षोडशापिस्तंभान्सुवस्त्रसमूहैःदुकूलादिभिश्छादयेदितिव्याख्या॥क्रियासारे॥नारिकेलीदलैर्वापिपल्लवैर्वाथवेणुभिः॥आछाद्यामंडपाःसर्वेद्वारवर्जनुसर्वतः।वास्तुशास्त्रे॥कटैःसक्षिप्तसंछायाविजयायास्तमंडपाइति॥हयग्रीवपंचरात्रे॥दर्पणैश्चामरैर्घंटैःस्तंभान्वस्त्रैर्विभूषयेदिति॥२०॥

अथतोरणान्याहवसंततिलकया॥पूर्वादिदिक्षुरचयेदपितोरणानिन्यग्रोधजंतुफलपिप्पलय
सराजैः॥अश्वत्थजंतुफलपर्कटिभरिपद्भिर्वैकामभावतइमान्यथवैककेन॥२१॥पूर्वादिदिक्षु
वटोदुंबराश्वत्थप्लक्षैस्तोरणानिरचयेत्।अथवाश्वत्थोदुंबरप्लक्षवटैरचयेत्।एषांवृक्षाणा
मभावेइमानितोरणानिएकेनैववृक्षेणयथोपपन्नेनरचयेत्।इतिव्याख्या॥महाकपित्थपंच
रात्रे॥देवास्तोरणरूपेणसंस्थितायज्ञमंडपे॥विघ्नविध्वंसनार्थायरक्षार्थमध्वरस्यचान्यसे
न्यग्रोधमेंद्यांतुयाम्यांचोदुंबरंतथा॥वारुण्यांपिप्पलंचैवकौबेर्यांप्लक्षजंन्यसेत्॥अश्वत्थो
दुंबरप्लक्षवटशाखाकृतानि च॥मंडपस्यप्रतिदिशंद्वाराण्येतानिकारयेत्।द्वाराकारत्वात्
द्वारशब्दप्रयोगः॥पंचरात्रे॥अलाभेप्येकमेवैषांसर्वाशासुनिवेशयेदिति।सर्वाभावेत्व
मीजंबूरवदिराणामन्यतमेनवाकार्याणीति॥२१॥ ॥अथतोरणमानंचविपरीतारभ्यान १२

स्याह॥हस्ताद्दहिर्मंडपतःशरांगस्वरैःकरैस्तान्यधमादिकेषु॥दीर्घाणिचप्राहुरथायतिःस्या
त्तेषांहिहस्ताचरणप्रवृध्या॥२२॥मंडपान्मंडपद्वारात्बहिर्हस्तमात्रेतानितोरणानिपंचष
ट्सप्तहस्तेदीर्घाणिअधमादिकेषु।अधममध्योत्तमेषुमंडपेषुप्रवदंति।अथतेषांतोरणा
नांआयतिरायामोहिहस्तःचरणवृध्यासहस्यात्।अधमेमंडपेहिहस्ताआयतिःमध्यमे
षडंगुलानिद्वौहस्तौउत्तमेसार्धहस्तद्वयंइतिव्याख्या।आरंभे॥पंचषट्सप्त हस्तानिहस्तस्व
रूपेणिताचि।वास्तुशास्त्रे॥पंचहस्तप्रमाणास्तेविस्तारेणहिहस्तकाः।षडंगुलाभिवृद्धाश्च
सप्तहस्तास्तथोत्तमे॥अर्थान्मध्यमेमंडपेषट्हस्ताःस्तंतोरणाइति॥२२॥ ॥अथफलकादि
निवेशनंउपजातीद्रवज्राभ्यामाह॥स्तंभार्धमानंफलकंतुतिर्यङ्देशविश्वप्रमितांगुलोच्चा॥
तन्मूर्ध्निकीलाःस्वनुरीयभागतताल्लशूलासूनयश्चनेस्युः॥२३॥तद्देशनंद्वित्रियुगांगुलानि

र्द्वौवेतुविष्कोर्यज्ञनेंगुलद्वैः॥कीलेषुशंखारिगदांबुजांकेषिघंशरोपःकिलतोरणेषु॥२४॥
स्तंभानांतोरणस्तंभानांदशांगुलपरीणाहानामर्धेनतिर्यक्फलकंउपांतयोसछिद्रंस्या
त्।फलकंनामतोरणस्तंभोपरितिर्यग्दीयमानंकाष्ठंपट्टिकेत्यभिधीयते।अल्पमंडपतो
रणेसार्धहस्तद्वयमितंमध्येहस्तत्रयपरिमितंउत्तमेचसार्धत्रयहस्तमितं।द्वौवेयागेचतुः
फलकमस्तकेशूलाश्चतयःनवैकादशत्रयोदशांगुलदीर्घाःस्वचतुर्थांशेनविस्तृताःतेनस
पादद्वयपादोनत्रयसपादत्रयांगुलविस्तृताः।स्वतोरणकाष्ठजाःकीलाश्चत्वारोभवंति।तेषांकी
लानांफलकस्यमध्यभागेवेशनंद्वित्रिचतुरंगुलमितं।अल्पमध्योत्तमेषुस्यान्मंडपेषु॥अ
थविष्णुयागे॥पुनःअंगुलद्वैरितिअधमादिषुमंडपेषुदशद्वादशचतुर्दशांगुलदीर्घाःस्व
चतुर्थांशेनविस्तृतेस्तेनसार्धद्वयत्रिसार्धत्रयांगुलायामाःवेशनार्थमधोलघुकीलनसहि

नाःप्रागादिक्रमेणशंखचक्रगदापद्मचिह्निताःकीलाःस्वतोरणकाष्ठभवाःफलकमध्ये
निधेयाः।तोरणास्तंभेष्वपिपंचमांशेनरवननमितिख्यारव्या।शारदातिलके॥तिर्यक्फलक
मानंस्यात्स्तंभानामर्धमानतइति।मंत्रमुक्तावल्यां।अग्रयोर्मध्यभागेचपट्टिकायांत्रिशूलकमि
तिखिंगलामते।शूलेनचिह्निताःकार्याद्वारशारवास्तुमस्तके।शूलेनवांगुलंदैर्घ्यंतुरीयांशेनवि
स्तृतिः।ऋजुवेमध्यमश्रृंगंकिंचिदूर्ध्वंतुपक्षयोः।प्रथमंतत्समाख्यातंत्र्यंगुलंरोपयेत्तथा।शोष
णांघ्र्यंगुलाद्वैर्वेशाश्चांगुलरहितइति।गरुडशास्त्रे।मस्तकेद्वादशांशेनशंखचक्रगदांबुजं।
प्रागादिक्रमयोगेनन्यसेत्तेषांस्वदारुजमिति।अत्रद्वादशांशाःशारवानामेव।केश्चित्फलकद्वाद
शांशेनेत्युक्तंतदसत्।शा खाःप्रस्तरेत्येवफलकादीनामानोक्तेःशूलान्यपिस्वदारुभवानीतिन्या
य्यं।शंखादिस्थानीयत्वात्।पंचमांशन्यसेद्ब्रह्मेतिसर्वसाधारणोविधिरिति॥२५॥ ॥अथमंडप

वर्णनिव्याजेनमंडपालंकरणानिवदन्मंडपकर्तृभ्यःआशिषंशार्दूलविक्रीडितेनप्रयच्छति॥
उद्यत्पत्रफलातिनम्रविलसद्भाभिरालिंगितस्तंभोनेकदलेरसालविटपैःसर्वत्रसंवेष्टितः॥
राजच्चामरसंप्रबद्धमुकुरोद्दंबद्धितानांचितोयुक्तःपुष्पफलैःफलायभवतांभूयान्महामंडपः॥
॥२५॥उद्यंतिपुष्पाणियासांतास्तथाफलैरतिनम्राःविलसत्यःकोमलाःएतादृ
श्योयारंभाःकदल्यस्ताभिरालिंगिताःस्तंभायस्यसःस्तंभमूलेधृतादृशकदलीकःबहुलपत्रै
राम्रपल्लवैःसर्वत्रकृतवेष्टनःराजंतिचामराणियस्मिन्नादृशाःसन्प्रबद्धामुकुराःआदर्शाय
स्मिन्नादृशःसन्उद्दंबंतिउपरिविलसंतिएतादृशानिवितानानितैरंचितोन्वितःपुष्पाणिपद्म
चंपकज्जातीमालतीमल्लिकाकुमुदादीनिफलानिनंबीरदाडिमकदलीनारिकेलपूगीफलादी
नितैरन्वितःएतादृशोयंमहामंडपःभवतांफलायउत्तमफलप्राप्तयेभूयादितिव्याख्या॥ ॥ १४

सिद्धांतशेखरे।चूतपल्लवमालाढ्यंवितानेरुपशोभितं॥विचित्रवस्त्रसंछन्नंपट्टकूलविभूषि
तं॥सफलैःकदलीस्तंभैःक्रमुकैर्नारिकेलजैः॥फलैर्नानाविधैर्भव्यैर्दर्पणैश्चामरैरपि॥
भूषितंमंडपंकुर्याद्दलपुष्पसमुज्वलमिति॥अन्यथाभावेपंचरात्रेदोषउक्तः।अनुक्तसाध
नैःकृतोयदिवाकुटिलाकृतिः॥मानाधिकोथवान्यूनोमंडपःकर्तृनाशनः॥यथोक्तेकृतेमं
डपेफलाधिक्यंतत्रैव॥आरब्धसाधनैःकृत्नःसरलैःसुसमानकः॥मनोज्ञोमंडपोयोसोक
र्मकर्तुःशुभावहइति॥२५॥ ॥अथध्वजनिवेशनंविपरीताख्यानक्याह॥ध्वजान्दिक्षुस्ता
यतिकांश्चपंचहस्तान्सुपीतारुणकृष्णनीलान्॥श्वेतासितश्वेतसितान्दिगीशवाहान्वदे
द्दिक्षुरवंशाग्रगर्वितान्॥२६॥ध्वजान्दिक्षुहस्तमितायामान्पंचहस्तदीर्घान्सुपीतारुणकृष्णनील
श्वेतरुक्षश्वेतश्वेतान्गैरिकादिलिखितदिक्पालवाहनान् दशहस्त वंशमस्तकेयो

जितान्हस्तद्वयनिखातान्ध्वजांस्तान्अपिपूर्वतइतिवक्ष्यमाणत्वात्प्राच्यादितआवहेत्या
रभेदितिव्याख्या॥प्रतिष्ठासारसंग्रहे॥पीतरक्तादिवर्णाश्चपंचहस्ताध्वजाःस्मृताः॥द्विपंचद्व
स्तदंडैस्तैर्वंशजैःसंयुतामताइति॥क्रियासारे।मातंगवस्तमहिषसिंहमत्स्येणवाजिनः॥रुषभंच
शुथान्यायंध्वजमध्येक्रमालिखेत्॥पंचांशंनिखनेदिति।अकरणेदोषः॥पंचरात्रे॥चिंतयं
यसुरश्रेष्ठाध्वजहीनंसुरालयं॥ध्वजेनरहितंब्रह्मन्मंडपेतुवृथाभवेत्॥पूजायागादिकं
सर्वंजपाद्यंयत्कृतंबुधैरिति।ध्वजारोपणफलंतत्रैवोक्तंज्ञात्वापुरुषःसम्यक्समस्तफल
माप्नुयात्॥२६॥ ॥अथपताकानिवेशनंमहाध्वजनिवेशनंनवमकुंडपताकानिवेश
नंचैकत्रानुष्टुभ्याहाह॥लोकेशवर्णास्त्रयुताःपताकाःशेषंदुदैर्घ्यंयतिका
श्रमध्ये॥चित्रंध्वजंदिक्करदीर्घवंशंत्रिदोस्ततंप्रांतगकिंकिणीकं॥२७॥श्वेतांचनव

मींपूर्वेज्ञानयोर्मध्यतोबुधः॥विन्यसेत्तुपताकांवध्वजांस्तान्अपिपूर्वतः॥२८॥लोकेशानां
लोकपालानांयेवर्णाःपीतादयः पूर्वश्लोकोक्ताःगैरिकादिलिखितवज्रशक्तिदंडखड्गपा
शांकुशागदात्रिशूलानितैर्युताःसप्तहस्तदीर्घाःएकहस्तविस्तृतापताकाःदशहस्तवंश
शीर्षगाःचित्रंध्वजंत्रिहस्तविस्तृतंप्रांतेवर्तमानकिंकिणीकंशीर्षेचामरंदशहस्तदैर्घ्यं
वंशश्चनादृशःतंमध्येविन्यसेत्॥पूर्वादितःपताकाश्चविन्यसेदित्युत्तरश्लोकेनान्वयः।न
वमीपताकांपूर्वेज्ञानयोर्मध्येश्वेतांतादृशीमेवाचार्यकुंडेविन्यसेत्॥ध्वजान्ताश्चापिपता
काश्चापिपूर्वादिक्रमेणाभूमोपंचांशरोपणेनविन्यसेदितिव्याख्या॥तदुक्तंसारसंग्रहे॥प्र
तिकुंडंपताकास्तुप्रोक्ताःशास्त्रार्थकोविदैः॥सप्तहस्तापताकाःस्युःसप्तमांशेनविस्तृ
ताः॥लोकपालानुवर्णेननवमीतुहिनप्रभा॥पताकाश्चध्वजाश्चापिगंधपुष्पसमन्वि

नाः॥इतिपरशुरामः॥त्रिहस्तविततोदीर्घोदशहस्तदशहस्तो॥न्वितेंन्वितः॥चामरेणा॥न्वितःश्री
र्वशांतेसखुइघंटिकः॥दशहस्तेधृतोदंडेगंधपुष्पैःसमन्वितइति॥२८॥ ॥अथकुंडनि
वेशनंविपरीतारव्यानक्याह॥प्राच्याश्चतुःकोणभगेंदुरंध्रत्रिकोणवृत्तांगभुजांबुजानि॥
अष्टास्त्रिशक्रेश्वरयोस्तमध्येवेदास्त्रिवाक्तमुशंतिकुंडं॥२९॥प्राग्वीताआरभ्यचतुरस्र
योनिरत्नार्धत्रिकोणवृत्तषडस्त्रपद्माष्टास्त्रिकुंडानिभवंतिप्राचीशान्योर्मध्येनवमा
चार्यकुंडंस्यात्तच्चतुरस्रंरत्नंवेतिव्याख्या॥नारदीये॥अष्टास्वाशासुरम्याणिकुं
डान्येतान्यनुक्रमात्॥चतुरस्रंयोनिरर्धचंद्राचार्यकुंडंमध्येस्यात्॥गौरीपतिमहेंद्रयोरि
ति॥सिद्धांतशेखरे॥पुरंदरशयोर्मध्येरत्नंवाचतुरस्रकं॥तदाचार्यविनिर्दिष्टइति॥अयमु
त्तमःपक्षः॥२९॥ ॥अथपंचकुंड्येककुंडनिवेशनंइंद्रवज्त्रयाह॥आग्नेयकुंडेरिहपंच

कुंडीचैकंयदापश्चिमसोमयोवे॥वेद्याःसपादेनकरेणयद्वापादांतरेणाखिलकुंडसंस्था
॥अ॥आग्नादिकृतत्रकुंडानिचतुरस्रवृत्तार्धवृत्तपद्मानिईशदिशिकुंडंचतुरस्रं रत्न
वातेःपंचकुंडीनिवेशनंस्यात्॥यदाचैकमेवकुंडंतदापश्चिमेउत्तरेवाईशान्यांवास्यात्॥
परंतुचतुरस्रंवेद्याःसकाशात्तानिसर्वाणिकुंडानिसपादेनकरेणत्रिंशदंगुलांतरेवेदि
पादांतरेणवावेद्याश्चतुर्थांशेनवा॥मंडपेनवकोष्ठरुतेषुभागेषुमध्येवाभवंतीतिव्या
ख्या॥नारदीये॥यत्रोपदिश्यतेकुंडंचतुष्कंतत्रकर्मणि॥वेदास्त्रमर्धचंद्रंचवृत्तंपद्मनिभं
तथा॥कुर्याच्चत्वारिकुंडानिप्राच्यादिषुविचक्षणः॥पंचमंकारयेत्कुंडंईशादिग्गोचरंहि
तेति॥अयंमध्यमःपक्षः॥केश्चित्पूर्वेशयोरितिलिखितंतदसत्॥सोमशंभो॥एकंवा
शिवकाष्ठायांप्रतीच्यांकारयेद्बुधः॥आचार्याअपि॥अथवादिशिकुंडमु त्तरस्यां

प्रविदध्याच्चतुरस्रमेकमेवेत्ययंकनिष्पक्षः।नवग्रहाधिकारेवसिष्ठसंहितायां॥कुंडंत
न्मध्यभागेतुकारयेच्चतुरस्रकं॥वितस्तिह्रयखातंतत्कुंडंसचतुरंगुलमितिवेदीपादांत
रंत्यक्त्वाकुंडानिनवपंचचेति।नारदीये॥कुंडवेदांतरंचैवसपादकरसंमितमितिकेश्चि
त्त्रयोदशांगुलमध्यंतरमुक्तंतत्रमंडपानुसारेणव्यवस्था॥३७॥ ॥अथवर्णविशेषे
स्त्रीणांचकुंडविशेषंशालिन्याह॥विप्राछुरस्रंचवृत्तंचवृत्तार्धत्र्यस्रिस्याद्वैश्यकोणनि
यापि॥सर्वाण्याहुर्वृत्तरूपाणिचान्येयोन्याकाराण्यंगनानांतुतानि॥३९॥विप्रादारभ्य
विप्रक्षत्रियविट्शूद्राणांचतुःकोणवृत्तवृत्तार्धत्रिकोणानिभवंति।अथवाविप्रादिव
र्णेषुचतुःकोणानिवृत्तुलानिवासर्वाणिकुंडानिभवंति।यदास्त्रीयजमानातदायोन्याका
राण्येवकुंडानिभवंतीतिव्याख्या।।शारदायां।।विप्राणांचतुरस्रंस्याद्राज्ञांवर्तुलमिष्य

ते॥वैश्यानामर्धचंद्राभंशूद्राणांत्र्यस्रमीरितं॥चतुरस्रंतुसर्वेषांकेचिदिच्छंतिपंडिताइति।
पंचसत्रे॥सर्वाणितानिवृत्तानिचतुरस्राणिवासदा॥सनत्कुमारः॥स्त्रीणांकुंडानिविप्रेंद्र
योन्याकाराणिकारयेदिति॥३९॥ ॥अथप्राच्यादिकुंडेषुफलविशेषमाह॥सिद्धिःपु
त्राःशुभंशत्रुनाशःशांतिर्मतिश्छिदे॥वृष्टिरारोग्यमुक्तंहिफलंप्राच्यादिकुंडके॥३२॥प्रा
च्यादिकुंडे ह्यष्टस्वष्टौफलानिस्युः॥शारदायां॥सर्वसिद्धिकरंकुंडंचतुरस्रमुदाहृतं॥पुत्र
प्रदंयोनिकुंडंमर्धेंदाभंशुभप्रदं॥शत्रुक्षयकरंत्र्यस्रंवर्तुलंशांतिकर्मणि॥छेदमारण
योःषट्कंषडस्रंपद्मसंनिभं॥वृष्टिदंरोगशमनंकुंडमष्टास्रमीरितं॥कामिकेतुफलांतरं॥
ऐंद्र्यांस्तंभेचतुःकोणमग्नौभोगेभगाकृति॥चंद्रार्धमारणेयाम्येद्वेषेत्र्यस्रंतुनिर्ऋते॥वा
रुण्यांशांतिकेवृत्तंषडस्र्युच्चाटनेनिले॥उदीच्यांपौष्टिकेपद्मंग्रामस्थाविभुक्तिदमिति॥३२॥

॥अथहोमसंख्ययाकुंडमानंशिखरिण्याह॥ज्ञाताधैरत्निःस्याच्छतपरिमितेऽरत्नितंतं
सहस्रेहस्तःस्यादयुतहवनेहस्तयुगलं॥चतुर्हस्तंलक्षेप्रयुतहवनेषट्करमितंकुट्टिवृ
कोटौन्यूनकरमपिप्राहुरपरे॥३३॥ज्ञाताधैमितेपंचाशन्मितेहोमेरत्निमितंकुंडं।ज्ञातमिते
ऽरत्निमितं।सहस्रमितेहोमेहस्तमितं।दशसहस्रमितेद्विहस्तं।लक्षहोमेचतुर्हस्तमितं
दशलक्षहोमेषड्हस्तं।कोटिहोमेऽष्टमितं।दशहस्तमितंवा।केचिन्षोडशकरमपिप्राहुरि
तिव्याख्या॥भविष्यपुराणे॥मुष्टिमानंज्ञाताधैतुज्ञातेचारत्निमात्रकं॥सहस्रेत्वथहोत
व्येकुंडंकुर्यात्करात्मकं॥द्विहस्तमयुतेतच्चलक्षहोमेचतुःकरं॥दशलक्षमितेहोमेषट्क
रंसंप्रचक्षते॥अष्टहस्तात्मकंकुंडंकोटिहोमेषुनाधिकं॥ज्ञारदायां॥दशहस्तमितंकुंडं
कोटिहोमेपिशस्यते॥स्कांदे॥कोटिहोमेचतुर्हस्तंचतुरस्रंसमंततः॥योनिवक्त्रद्वयोपे १८

तंतरप्याहुस्त्रिमेखलमिति।इदंप्रायःस्थूलहव्यविषयं॥३३॥ ॥अथकेचिन्मतेकुंडमान
मुपन्यासिकयाह॥लक्षेकरध्यादशलक्षकान्तंकरैकरध्यादशहस्तकंच॥कोट्यर्धदिग्विंश
तिलक्षलक्षदलेमुनीषुर्तुरुद्रानुहस्तं॥३४॥लक्षस्येकरध्यादशलक्षाणामंतंसमाप्तिंम
र्यादीकृत्येत्यादशलक्षकांतंएकलक्षमारभ्यलक्षरध्यादशलक्षपर्यंतमित्यर्थः।करस्यएक
रध्यादशहस्तकंमर्यादीकृत्येत्यादशहस्तकंएककरमारभ्यएककररध्यादशहस्तंयावत्कुंड
माहुरित्यपूर्वेणान्वयः।कोटेरर्धंपंचाशल्लक्षेदशलक्षे।विंशतिलक्षेलक्षदलेपंचाशत्सह
स्रकमानं॥सप्तपंचषट्त्रिकरंकुंडमितिव्याख्या॥ज्ञारदायां॥एकहस्तमितंकुंडंलक्षहो
मेविधीयते।लक्षाणांदशकंयावत्तावद्धस्तेनवर्धयेत्।सिद्धांतशेखरे॥लक्षार्धंत्रिकरंकुंडं
लक्षहोमेचतुःकरं॥कुंडंपंचकरंप्रोक्तंदशलक्षाहुतौक्रमात्॥षड्हस्तंलक्षविंशत्यांकोट्य

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

र्धहस्तसप्तकमिति।इदमेवकुंडमानंकादिककादिमंतसिद्धांतशेखरशारदाहेमाद्रि प्र
मुखैःप्राचीनैःरामयाजपेयिराघवभट्टकुंडरत्नाकरकुंडकौमुदीकारादिभिर्नवीनैश्चलि
खितंकुत्रचिदन्यथापिकुंडमानान्युक्तानितानितत्प्रकरणवशात्तत्कर्मविशेषेदृष्टव्यानि।
॥३४॥ ॥अथैकहस्ताद्दशहस्तांतयावत्कुंडेषुभुजमानंशार्दूलविक्रीडितेनाह॥वेदाक्षीणि
युगाग्नयःशशियुगान्यष्टाध्वयस्त्रीषवोष्टाक्षावब्धिरसारसांगकमितानेत्रर्षयोंशस्वराः॥
अंगुल्योथयवाःखमभ्रमिषवःखपंचषट्सागराःसप्ताभ्रंमुनयस्त्वमीनिगदितावेदा
स्त्रकेबाहवः॥३५॥एकहस्तेकुंडेचतुर्विंशत्यंगुलान्यायामविस्तारोद्विहस्तेचतुस्त्रिंशदंगु
लानिइमानिपादोनयूकाचतुष्टयन्यूनानि।अर्धमेवशेषाणिसर्वत्रज्ञेयानि।त्रिहस्तेपं
चयवाधिकेकचत्वारिंशदंगुलानि।चतुर्हस्तेष्टचत्वारिंशत्पंचहस्तेपंचयवाधिकानि ७९
विपंचाशदंगुलानि।षड्हस्तेपादोनैकोनषष्टिः।सप्तहस्तेसार्धत्रिषष्टिः।अष्टहस्तेयवोन
सप्तषष्टिः।नवहस्तेद्वासप्ततिः।दशहस्तेय वोनषट्सप्ततिरिति।चतुर्भुजेकुंडेभुजाउक्ताः।
इतिव्यास्त्या॥यत्रोपपत्तिः।एकहस्तस्यक्षेत्रस्यचतुर्विंशत्यंगुलात्मकस्यभुजकोटिघातःक्षे
त्रफलंतच्चषट्सप्तत्यधिकपंचशतं।५७६एतत्परएकहस्तक्षेत्रांगुलानिचतुर्विंशतिः२४
एवंक्षेत्रफलस्यद्व्यादिगुणस्यमूलंचतुस्त्रिंशदादयांगुलानिभवंति॥३५॥ ॥अथयोनि
निवेशानमिदंवक्ष्यामः॥कुंडत्रयीदक्षिणयोनिरेंद्र्याःसौम्याग्रकास्यादितराणिपंच॥पश्चा
द्भगानींद्रदिगग्रकाणियोनिर्नकोणेनचयोनिकुंडे॥३६॥ऐंद्र्याःप्राच्याआरभ्यकुंडत्रयीच
तुरस्रयोनिरुक्तार्धसूपादक्षिणयोनिःस्यात्।उत्तराग्राअर्धेंदोताउदग्मुखाःइतराणिपं
चकुंडानिव्यस्रिवृत्तषडस्रिपद्माष्टास्राणिप्रत्यग्योनीनिप्रागग्राणि।अर्धेंदोताप्राङ्मुखाः।

नवमम पिकुंडंदक्षिणयोनिउदग्ग्रंयोनिःकोणेयोनिकुंडेचनकार्येनिव्याख्या॥स्वायंभुवे॥
प्राग्मिम्याम्यकुंडानांप्रोक्तायोनिरुदङ्मुखी॥पूर्वामुखाःस्थिताःशेषायथाशोभंव्यवस्थिता
इति॥त्रैलोक्यसारे॥नवमस्यापिकुंडस्ययोनिर्दक्षदलेस्थितेति॥अन्यत्र॥नार्पयेत्कुंडकोणे
षुयोनिंतांतंत्रवित्तमः॥इतियोनिकुंडेनथायोनिपद्मेनाभिंविवर्जयेदिति॥३६॥ ॥अथसर्व
षांकुंडानांप्रकृतिभूतंचतुरस्रंतावच्छालिन्याह॥द्विघ्न्यासंतुर्यचिद्भंसपाशंसत्रंशकोप
श्चिमेपूर्वगेपि॥दत्वाकर्षैकोणयोःपाशतुर्यंस्यादेवंभावेदकोणंसमानं॥३७॥इष्टव्यासा
द्द्विगुणितव्यासंचतुर्थांशेकृतचिद्भंसपाशंसत्रंपूर्वपश्चिमस्थयोःशंकोर्दत्वादक्षिणोत्त
रसूत्रमध्येयथामध्यचिद्भंभवतितथाकोणयोःपाशञ्चतुर्थांशेकर्षेत्॥एवमन्यतोपि॥
एवंकृतेसमचतुरस्रंस्यात्॥इदमेवसर्वेषांकुंडानांमूलमितिव्याख्या॥उक्तं॥चतुरस्रमिदं २०

प्रोक्तंसर्वकुंडेषुकारणमिति॥अत्रसमश्रुतौतु ल्यचतुर्भुजेचतथायतेतद्भुजकोटिघात
क्षेत्रफलंषट्सप्तत्यधिकपंचशतिं॥एतावदेवयोन्यादिकुंडेषुएकहस्तेषुयथा क्षेत्रफलंसंप
द्येततथायतितव्यमिति॥३८॥अथयोनिकुंडमिंदुवज्त्रयाह॥क्षेत्रेजिनांशैस्तुपुरःशरांशान्सं
वर्ध्यचस्त्रीयरदांशयुक्तान्॥कर्णाघ्रिमानेनलिखेद्दुखंडंप्रत्यक्पुरोंकाद्गुणतोभगाभं॥३९॥
चतुरस्रेक्षेत्रेचतुर्विंशतिभागेकृतेसतिपंचांशान्स्त्रीयद्वात्रिंशदंशयुक्तान्ग्रेसंवर्ध्यततश्च
तुर्थांविभक्तस्यक्षेत्रस्यपश्चिमचतुरस्रद्वयमध्यांकान्कर्णसूत्रस्यचतुर्थांशेनप्रत्यक्पश्चिम
भागेदुखंडेऽर्धार्धद्वयंविद्वल्लिख॥ततःपूर्वांकान्दक्षिणोत्तरसूत्रसंलग्नरेखार्धंयावन्नी
यमानगुणद्वयतोभगाकारंयोनिकुंडंस्यादितिव्याख्या॥अथक्षेत्रफलानयनं॥अथक्षेत्रत्रयं॥
पूर्वांकान्दक्षिणोत्तरसूत्राग्रेयावन्नीयमानसूत्रद्वयात्त्रिकोणमेकं॥तथादक्षिणोत्तरसूत्राग्रा

स्वर्वापरसूत्रापरांतंयावन्नीयमानसूत्रद्वयादपरंत्रिकोणं।उभयवृत्तार्धमीलिताएकं
वृत्तमितितृतीयंक्षेत्रत्रयफलयोगेपूर्णफलंतत्रप्रथमत्रिकोणस्यफलं।अत्रलंबः
अंगुलानि१७यवः१यूका२भः२४।लंबेननिघ्नंकुसुरवेक्यरवंडमितिअत्रसुरवाभा
वात्भस्यर्धमेवलंबेनगुणितंसत्तज्जातं।प्रथमंक्षेत्रफलं।अंगुलानि२०५यवाः७अप
रस्यलंबः।अंगुलानि१२भः२४सैवअत्रापितयेवरीत्याक्षेत्रफलं।१४४अथवृत्तार्ध
योरेकंवृत्तंतत्तलंवृत्तव्यासः।अंगुलानिवृत्तव्यासः अंगुलानि१६यवाः७यूकाः६लि
क्षा१व्यासस्यवर्गेभनगाग्निनिघ्नेसूक्ष्मंफलंपंचसहस्रभक्ते।इतिव्यासस्यवर्गः२८८।०
२।३।४।१अयंभनवग्नि३९२७निघ्नः पंचसहभक्तोजातंक्षेत्रफलंवृत्तस्य२२६।१।४।५।
त्रयाणांयोगेक्षेत्रफलंपूर्ण५७६।१४।५।अत्रलिक्षापंचकं५यूकाचतुष्टयंचाधिकं।अ

ल्पांतरत्वाद्दोषः।ध्रुवायसिद्धि श्रा।उक्तंचाचार्यैःस्थापनेसर्वकुंडानांध्रुवायः सर्वसिद्धिदः।श्र
तांशोवाधिकंहीनंह्रासवृद्धीनदूषयेत्। आयदोषविशुध्यर्थंक्रियतेशास्त्रकोविदैरिति।
एतत्क्षेत्रस्योत्तराग्रत्वादुदीचीप्राचीवृद्ध्यवहर्तव्या। एवमन्यकुंडयोरपिायत्नतोर्थादर्शी च
नुविंशतिधामध्यसूत्रंभक्त्वापुरोन्यसेत्।पं चांशानथैकैकस्यांशान्कोणपार्श्वतः
वृत्तार्धस्तोनध्रुवनिर्यकसूत्रांतंचत तोर्पयेत्।पुरोवर्धितसूत्रांतंद्वेसूत्रस्याङ्गाङ्गुलिरिनिर्दि
ष्टानिकुंडानिकादिमत्तादिविरुद्धानीति।अनादरणीयानिनतानिवचनानितराकारत्वमात्र
संपादकानिनक्षेत्रफलपूर्तिकराणिात त्रविशिष्यश्लेषोमाभूदितिसूक्ष्ममार्गणयोन्याद्या
कारमात्रंप्रतिपाद्यतेायोगणितानभिज्ञस्तेनचतुरस्रखातमध्येनंडुलादिरत्नानसुनयो
न्यादिखातेनिक्षिप्यनक्तत्सलपूर्तौतोष्यमितिअत्रांगुलयवयूकालिक्षात्वागामूर्ति

कारीत्यागुणयित्वाऽष्टभिर्भागेगृहीतेचउपर्युपरिचयोज्यमानेकलाद्युत्पद्यते।अंससवर्णनादिकुंडमात्रेपिज्ञेयं॥३६॥ ॥अथवसंतमालिकयावृत्तार्धसाधनमाह॥स्वशरांशायुतेषुभागहीनास्वधरित्रीमितकर्करेनमध्यान॥कृतवृत्तदलेयतश्चजीवांविद्धालिंदुदलस्यसाधुसिध्ये॥३७॥स्वीयशरांशोनयुतोयइषुभागःपंचमांशाःअर्धाक्षेत्रस्येवतेनहीनाचासोस्वभूमिःक्षेत्रंतन्मितेनकर्करेनसूत्रेणवामध्यांकात्कृतंयद्वृत्तार्धंतस्मिन्नयतःपूर्वापरारेखांनीवरूपांवृत्तार्धस्यसिध्येसाधुस्याद्यथाकरोतुविद्वानितिव्याख्या॥अत्रक्षेत्रफलं॥अत्रपंचांशोगुलादिः।४।६।३।१।५।एतस्यशरांशोगुलादिः।०।०।३।०।४।अनेनान्वितः पंचांशः।४।६।२।१।अनेनोनाक्षेत्रभूमिः।१९।१।१।५।७।एतद्व्यासार्धंद्विगुणंव्यासः३८।२।३।३।६।अत्रापिव्यासस्यवर्गः१४।६७।१।५।४।३।अयंव्यासस्यवर्गः५७६१७४०।अयंभजनयाग्निघ्नः॥इत्यारिरी

त्याक्षेत्रफलं।अयंपंचसहस्रभक्तः।११५२।२।६२।एतद्वृत्तफलं।अस्यार्धंवृत्तार्धक्षेत्रफलं।५७६।१।३।१।अल्पांतरत्वादोषः।अत्रापिध्वजायएवेति॥३८॥ ॥अत्रत्र्यस्रवृत्तकुंडेशाईबलविक्रीडितेनाह॥वक्त्रंशंपुरतोविधायचपुनःश्रोण्योश्चतुर्थांशकंचिद्भेषुत्रिषुसत्रयाननहृदंस्यात्त्र्यस्रिकृष्टोस्मितं॥विश्वांशोःस्वजिनांशकेनसहितैःक्षेत्रेजिनांशोनतेव्यासार्धेनमितेनमंडलमिदंस्याद्वृत्तसंज्ञंशुभं॥३९॥अथपूर्वार्धेकुंडंव्याख्यायते।क्षेत्रस्यनतीयांशंपूर्वतोनिधायततउभयश्रोण्योश्चतुर्थांशंनिधायदक्षिणतउत्तरतश्चदत्वात्रिषुचिद्भेषुसत्रयाननात्कृष्टरहितंत्र्यस्रिजायतइतिव्याख्या॥अथक्षेत्रफलानयनं॥अत्रमुख्याभावात्भूमेरेवार्धकृतेर्द्वदंलंबेनानेन।३२।निघ्नंजातंक्षेत्रफलं।५७६।समभुजतासद्यःक्षेत्रफलंचसिध्यतीतिकृष्टोस्मितमिसुक्तं।अत्रकिंचिद्भुजवैषम्यंतद्दोषायअत्रापिध्वजायएवेति

अथोत्तरार्धेनवृत्तमाह॥क्षेत्रेचतुर्विंशतिभक्तेसतित्रयोदशांशैःस्वचतुर्विंशांशयुतेर्भिते
नव्यासार्धेनमंडलंयद्वृत्तंतद्वृत्तसंज्ञंकुंडंसुंदरंस्यात्।अथक्षेत्रफलानयनं।अत्रत्रयो
दशानांचतुर्विंशांशांगुलादिः।१४।२।५।३।अनेनयुतास्त्रयोदश १३।४।२।५।३।इदंव्यासा
र्धंएतद्दिगुणंव्यासः२७।१।५।२।६।अत्रापिव्यासस्यवर्गेस्मिन्७३३।४।१।१।०।भनवाग्नि
निघ्ने२८८।२९५पंचसहस्रभक्तेइत्यादिनाक्षेत्रफलं५७६।१।६।१।अत्रध्वजाय एवेति
॥४०॥अथषडस्रंस्रग्धरयाह॥ ॥भक्तेक्षेत्रेजिनांशैर्धृतिमितलवकैःस्वाक्षिशैलांशयु
क्तैर्व्यासार्धान्मंडलेतन्मितधृतगुणकेकर्कटेचेंदुदिक्कैः॥षट्चिह्नेषुप्रदाद्रसमित
गुणकानेकमेकंतुहित्वानाशेसंध्यंगदोषामपिचयतिकृतेःषड्भुजेनेत्ररम्यं॥४१॥क्षे
त्रेचतुर्विंशतिधाभक्तेसतिअष्टादशांशैस्तद्वासमितमांशयुक्तेस्तावत्यासार्धनव

तेरूनेसतिउत्तरदिक्कः तेनैवव्यासार्धेनमितेधृतेगुणकेसत्रेसतिकर्कटेवाधृतेसतिपरावर्तनेनषट्चिह्नानिभवंतितेषुषट्सुचिह्नेषुषट्सूत्राणिएकांतरालेपरस्परंसंलग्नानिरचयेत्ततःसंधौयेत्रांगसंख्याःषड्भुजास्तेषांनाशेसतिकृतेर्मंडलस्यापिनाशेषडस्रंनेत्ररम्यं जायतइतिव्याख्या।अस्मिन्षडस्रेव्यासः३६।४।०।अत्रउत्तराग्रंत्रिकोणमेकंमहत्तद्भुजानांमानं३१।४।७१०।उत्तराग्रात्पूर्वापरभुजमध्यंयावन्नीयमानंसूत्रंलंबश्चतुर्थांशोनोव्यासएव२७।३।०।भुजएवभूःमुखाभावात्भूम्यर्धं१५।६।३।४।लंबेननिघ्नमित्यादिनाजातंक्षेत्रफलं४३२।२।अथमहतस्त्रिभुजस्यत्रिष्वपिभुजेषुत्रीणित्र्यस्राणिसमानेयलग्नानिसंति।तत्रैकस्यफलमानीयत्रिगुणंकृत्वापूर्वफलेयोजितंसत्पूर्णक्षेत्रफलंस्यात्।तत्रदक्षिणकोणात्पूर्वापरभुजमध्यावधिनीयमानंसूत्रंलंबः।१।०।अयंव्यासचतुर्थांशः

भुजश्चंशोफलमिः१०।४।२।३।सर्वत्रत्र्यंसे एवभुजपाताच्चाग्रमुखाभावाद्भूमेरर्धं
५।२।१।१।इदंलंबेनगुणितंक्षेत्रफलंजातं४८।०।३।इदंत्रिगुणंत्र्यस्राणामपिफलं१४४।१।१
इदंपूर्वक्षेत्रफलेऽस्मिन्४३२।५।२।योजितं५७६।६।३।इदंयत्रयाधिकषट्यवाधिकं।अ
स्यांतरत्वाद्दोषः।अथवाव्यासोयुक्तयेकयोनःकार्यःभुजायांसिद्ध्यै।अथवाक्षेत्रे
तावताश्रयासेनलघुत्रिकोणंयत्तत्क्षेत्रस्यद्वादशांशाःतत्क्षेत्रफलं४८।०।३।तद्वादशगु
णंपूर्वक्षेत्रफलंस्यादिति।अथेदंकुंडंस्वबुद्धिविलासमात्ररचितमितिनोपेक्षणीयंयतः
षट्कोणतासमभुजनाक्षेत्रफलंचसंपद्यतएव।मानाधिक्येभवेद्योगोमानहीनेदरिद्र
तिइत्यादिदोषोपपत्तिरपिनास्ति।अथवक्ष्यंप्राचीनकृतकुंडविरुद्धं।तर्हिदृश्यतेच
प्राचीनकृतकुंडेषुपरस्परविरुद्धता।इदमेवकुंडंसमवाजपेयेऽग्निर्विषमभुजंमृदंगाकृ

रंकनंराघवभद्रादिभिःसमभुजमेवकारितंलक्ष्मणाचार्यादयोपिअन्यथैवोचुः।तस्मा
दस्मदुक्तेनेत्ररमणीयेसमभुजेक्षेत्रफलसेवादिनिषट्कोणविद्वद्भिर्नानादरेणाभाव्यमिति।
॥४१॥ ॥अथवेप्राचीनकृतावेवाग्रहिलास्तेषांतोषायापिसमषट्भुजंषडस्रंचवसंतमालि
कयाह॥अथवाजिनभक्तकुंडमानात्त्रिंशद्भागैःस्वस्वभद्रपभागहीनैः॥मितकर्कटकोद्भवेनु
रत्नेविधुदिक्कैःसमषट्भुजैःषडस्रं॥४२॥अथवाचतुर्विंशतिभक्तकुंडमानेसतिस्वीयस्व
स्वयधिकद्वादशभागेनहीनैःपंचदशांशभागैर्मितोयःकर्कटस्तद्भवेरत्नेऽन्यरदिक्कैःसकाशात्स
मैःषट्भुजैःरत्नैःपरस्परलग्नैःषडस्रंरचितमार्जनेनभवतीतिव्याख्या॥अथक्षेत्रफलानयनं॥
तत्रत्रिभुजेद्विसंभक्तेषडस्रेस्युर्भुजास्फुटाइति।भुजमानं१४।७।२।क्षेत्रमध्येदक्षिणो
त्तरंरेखामुर्ध्वंभुजसंपाततःपूर्वापररेखाद्वयंअधोभुजसंपातावधिदद्यात्।एवंरत्नेचतु

रस्त्रद्वयंपरस्परलग्नंभवतिपूर्वापररेखयोःदक्षिणोत्तररेखयासहसंपातश्चतुर्थांशोभ
वतिसैवाबाधातन्मानं७।३।५।भुजः१४।७।२।स्वाबाधाभुजकोटेरंतरमूलंप्रजायतेलंबः
इतिसाधितोलंबः१२।७।३।अथमेवमध्यलंबलंबेननिघ्नंकुर्यात्६।४।मुरोक्य१४।७।यदैक्यं।
४४।पा६।खंडं२२।२।७।इतिज्ञातंक्षेत्रफलं२८८एवमपरस्यापिखंडस्य२८८उभययोगेप५७६घ्न
ज्ञायसिद्धिश्चेति॥४२॥ ॥अथपद्मकुंडंज्ञार्द्धविधीडितेनाह॥अष्टांशाद्यैयतश्चरत्नशरके
तत्रादिमेकर्णिकायुग्मेषोडशकेसराणिचरमेस्वांकेंदुभागोनिते॥भक्तेषोडशधाशरांतरधृतेस्यु
र्कर्कटेषोडशाःसर्वास्तान्रत्नकर्णिकांत्यजनिज्ञायामोद्भवांस्यात्क्रमं॥४३॥क्षेत्रस्यअष्टमां
शात्अष्टांशवध्याचरत्नपंचकेकृतेसतितत्रपंचकमध्येप्रथमंतात्कर्णिका१द्वितीयेषोडशके
सराणिद्वितीयंकेसरस्थानमित्यर्थः।अंतिमेपंचमरत्नेस्वस्यअंगुलत्रयात्मकस्यएकोनविंश

संज्ञेनोनितेसतिषोडशस्थानेषुदिक्षुविदिक्षुतदंतरालेचसमतयाविभाजितेतस्मिन्कृते
पंचकचिह्नांतरेदिशिविदिशिकर्कटेधृतेसतिपरावर्तनेअष्टौपत्राणिजायंते।सर्वांस्तान्
केसरादिनतानिकेसररत्नपत्राणिचद्वेविद्यात्रत्नकर्णिकांत्यजमारत्नात्कीदृशीनिजःस्व
यःआयामोविस्तरःतत्तुल्यं श्रौच्चकंयस्यास्तांकजंपद्मकुंडंबहिर्वृत्तप्रमार्जनेनस्यादिति
व्याख्या।अथक्षेत्रफलंतत्रोपांतिमस्यचतुर्विंशत्यंगुलस्यपूर्ववत्क्षेत्रफलं४५।२३।१।
अंतिमस्यरत्नस्यास्य२९।६।५।७।क्षेत्रफलं६९९।४।५।अनयोरंतरार्धं।१२३।४१६।०।इदंपूर्वक्षे
त्रफलेयोजितंवाअंतिमक्षेत्रान्निष्कासितंवाजातंपूर्णफलं५७६।०।यूकोनंफलमायातिअ
नोदोषः।अंतिमेरत्नेलिक्षामात्रंवर्धयित्वाध्रुवायसिद्धिर्भवतीति॥४३॥इतिपद्मकुंडं॥ ॥
अथाष्टास्रिकुंडंउपजातिकयाह॥क्षेत्रेजिनांशोगजचंद्रभागैःस्वाष्टांशभागेनयुतेस्तरत्ने।

विदिग्दिशोरंतरतोऽस्त्रैस्तत्तीयपुक्तैरिदमष्टकोणं॥४४॥क्षेत्रेचतुर्विंशतिभागेकृतेस
तिअष्टादशाभागैःस्वीयाष्टाविंशांशोनयुतैःकर्कटेनवृत्तेसतिअर्थाच्यासोद्विगुणःदि
ग्विदिशोर्मध्येकृताष्टचिह्नेभ्यःअष्टभुजैस्तत्तीयमीलितैश्चिह्नद्वयंविहायचिह्नयोजि
तैरष्टकोणंवृत्तमार्जनान्मध्यस्थाष्टयोःखंडमार्जनाच्चभवतीतिव्याख्या।अत्रक्षेत्रफला
नयनं।अत्रव्यासार्धं।१८।५।१।अयंव्यासः३७।२।२।अथद्विद्विनंदेषुसागरैर्वृत्तव्यासेसमाह
ति।खखखाभ्रार्कभक्तेषुलब्धनेत्रमशोभुजाइति।१४।२२। एतत्कृहद्भुजमानं।दक्षिणोत्तररे
खाकोटिः।आयतेक्षेत्रेभुजकोटिघातः।फलंभुजकोटिज्ञानंतुवृहद्भुजः तुल्यंमध्येअंतरं
एतत्।१४।२।२।दक्षिणोत्तररेखाभयंप्रांतवर्तिरेखाखंडमानयोर्जातंतत्कोटिस्यात्।यथा
दक्षिणोत्तर पूर्वापररेखाखंडयोर्गादूर्ध्वरेखानिर्यकूरेखेभुजकोटिरेखेतदग्रानीयमाने

महान्भुजएवकर्णः१४।२।२।अस्यवर्गार्धमूलंतिर्यगूर्ध्वरूपंभुजकोटिमानं।१७।०।६।यतभु
जकोटिवर्गकर्णवर्गोभवतिइदंकोटिमानंद्विघ्नंद्विघ्नंसत्पूर्वभुजेयोजितंजातंकोटि।दक्षिणो
त्तररेखारूपा३४।३।५।४।एतद्वृहद्भुजघातेफलं४९२।१।१।२।अथकोणक्षेत्रयोःफलंलघु
भुजवर्गतुल्यं१०१।७।६।एतत्पूर्वफलादस्मात्४९२।१।१।२।शोधितंसत्जातंफलं३९०।१।३।
अस्मिन्पूर्वापरकोणानांचतुर्णांफलंयोजितंसत्पूर्णंफलंस्यात्।तत्रपूर्वकोणयोःफलंयथाद्
वृहद्भुजोभुजः१४।३।२।पूर्वापररेखाखंडकोटि१०।७।६।२।अनयोर्घातः१४४।१।५।२।अस्मात्कोण
क्षेत्रफलमेतत्५०।७।७।शोधितंसत्जातंपूर्वकोणयोःफलं।९३।१।६।एतावदेवापरकोणयोःअ
तःद्विनिघ्नमेतत्१८६।३।४।पूर्वक्षेत्रफलेस्मिन्३९०।१।३।२।योजितंसत्जातंक्षेत्रफलं।५७६।५।०
अत्यंतरत्नादरोषः।ध्वजायसिद्धिश्च।इदंसर्वथानेत्रमणीयेमित्यंगीकर्तव्यं॥४४॥ ॥

अथप्रकारांतरेणसमाष्टभुजंअष्टास्रिकुंडमाह॥मध्येगुणेवेदयमेर्विभक्तेशरेर्निजर्थांश
लवेनयुक्तैः॥दलेदलेदिग्विदिशोंतरालेगतैर्भुजैःस्यादथवाष्टकोणं॥४५॥मध्यसूत्रेचतुर्वि
शधाभक्तेसमप्तचत्वारिंशदंशसहितैश्चतुर्दशभिर्व्यासार्धेनमंडलेकृतेतत्रदिग्विदिशोर्मध्ये
कृताष्टसूत्रैःपरस्परसंलग्नै रष्टकोणंप्रकारांतरेणप्राचीनरुतिरसिकाभिमतंकुंडंदृत्तमाह
नाड्ववतीतिव्याख्या॥अथक्षेत्रफलानयनं॥चंद्रर्तुनंदाद्रयतिभि र्हृतेव्यासेसमाहते॥खखखा
स्त्रार्कसंभक्तेलभ्यंतेक्रमशोभुजाः॥इतिभुजानांमानं॥अत्रभुजएवज्या१०।७।४।३।४॥ततोज्या
व्यासयोगांतरघातमूलं॥व्यासस्तद्दोर्दलितःशरस्यादितिजातशरः१०।७।१।६॥अथयाम्यभु
जोस्याभयांतान्॥संमुख्यापरभुजसतद्दयंयावत्॥सूत्रद्वयंकुर्यात्॥एवंकृतेतिर्यगूर्ध्वचतुरस्र
पार्श्वयोर्विषमंभुजचतुरस्रद्वयंचस्यात्॥अत्रव्यासदशमात्२८।४।६॥शरान्हिगुणंशरंविहा

यत्रोपरीर्घचतुरस्रस्यभुजः॥आयतेभुजकोटिघातःक्षेत्रफलं२८८।४।४॥अथविषमचतुर्भुज
क्षेत्रफलं॥जीवार्धशरोनंव्यासार्धंविषमचतुर्भुजेलवः७।५।५॥निघ्नंशरं६।३॥मुखे१०।७।४।३॥
क्यं३।२।४।३॥खंड१८५।२।१॥इतिक्षेत्रफलं१४३।६।४॥एवमपरस्यापि१४३।६।४॥अत्रयाम्य
योगः५७६।१।४।६॥ध्वजायसिद्धिश्च॥अथवाष्टथकूधनुषाफलमानीयवृत्तफलात्संशोध्यापिक्षे
त्रफलंस्यादिति॥अस्मिन्समाष्टभुजेराघवभट्टादिभिरुक्तेशरदादिवाक्यैःसहमहान्विरोधः
तस्मादस्मदुक्तमष्टास्रिनेत्ररम्यक्षेत्रफलंसंवादि॥समभुजमेवआदरणीयमिति॥४५॥॥अ
थखातलक्षणंकंठलक्षणंचाह॥खातंक्षेत्रसमंप्राहुरन्यत्तुमेखलांविना॥कंठोजिनांशमानः
स्यादर्कांशाद्विगुणोपरे॥४६॥कुंडखननंक्षेत्रसमंकुंडस्ययावान्विस्तारःआयामश्चतावत्खनन
मध्येमेखलासहितेकुंडेकार्यं॥योन्यादिकुंडेषुविस्तारायामयोर्नानात्वात्॥चतुरस्रस्येवायाम

विस्तारो ग्राह्यो। अन्ये तु मेखलां वर्जयित्वाभ्रमावेवतावत् खननं कार्यमित्याहुः। कंठोपि क्षेत्रचतु
र्विंशत्यंशमानः। खाताद्बहिः समंतादेकांगुलमितः। अन्ये तु क्षेत्रस्य हस्तांशपरिमितमिति प्राहु
रिति व्याख्या। सिद्धांतशेखरे॥ खातं कुंडप्रमाणं स्याद्ऊर्ध्वं मेखलया सहेति। प्रतिष्ठासारसंग्रहे। पंच
त्रिमेखलयोच्छ्रायं ज्ञात्वा शेषमधः खनेत्। मोहपटलोत्तरे। हस्तमात्रं खनेन्नित्यं गूर्ध्वं मेखलया सहेति।
अथ पक्षांतरे शारदातिलके। यावान् कुंडस्य विस्तारः खननं तावदीरितमिति। प्रयोगसारे। चतुरस्रं च
तुःषष्ठ्यंशैः कृत्वा यथापुरा। हस्तमात्रेण तन्मध्ये नाभिन्नायतं खनेत्। गणेशविमर्शिन्यां। चतु
र्विंशांगुलायामं तावत्खातसमन्वितमिति। अथपक्षद्वैधे वयं तु। स्मृतिद्वैधे तु विषमः कल्पनीय
एवाथ क्वथगिति। वचनात्। होमाल्पत्वबहुत्वे पूर्वोत्तरपक्षावाश्रयणीयावितियुक्तं। यतः सो चि
यादर्थात्परिमाणमिति कात्यायनोक्तिकालोत्तरे॥ खातात्त्र्याद्यंगुलः कुंडः सर्वकुंडेषयं विधिः॥ २८

चतुर्विंशतिमो भागः कुंडानामंगुलं स्मृतमिति। एतत्परिभाषिकमंगुलं सर्वत्रबोद्धव्यं। सोम
शंभौ। बहिरेकांगुलः कंठो ह्यंगुलादिभवेत्क्वचित्। इतितन्न। आद्यपक्षएवश्रेयान् बहुस
मतत्वात्॥४६॥ ॥अथमेखलानामधमादिपक्षमाह॥ अधमामेखलैकास्यान्मध्यमांमेख
लाद्वयं॥ श्रेष्ठास्तिस्रोथवाद्वित्रिपंचमतादिकं॥४७॥ एकमेखलपक्षोधमः द्विमेखलपक्षोम
ध्यमः त्रिमेखलः श्रेष्ठः। अथपक्षांतरे। द्विमेखलोधमः पक्षः। त्रिमेखलोमध्यः पंचमेखलः।
श्रेयान्। एकमेखलोधमाधमः। इतिव्याख्या। क्रियासारे। नाभियोनिसमायुक्तं कुंडं श्रेष्ठं त्रिमेख
लं। कुंडं द्विमेखलंमध्यं नीचंस्यादेकमेखलमिति। लक्षणसंग्रहे। मुख्यास्तु पंचताप्रोक्ता म
ध्यमास्तिस्रएवच। हेस्यातामधमेप्रोक्तं एकासात्वधमाधमेति। सोमशंभुनातुविशेषउक्तः।
त्रिमेखलंद्विजेकुंडं क्षत्रियस्यद्विमेखलं। मेखलैकातुवैश्यस्येति॥४७॥ ॥अथखातंसमे
खलंक्षेत्रसममितिस्पष्टयन्मेखलालक्षणंस्वांगतयाह॥ अष्टधाविहितकुंडशरांशैः खने सं

ध्रुवमुपर्यनलांशोः॥मेखलाविरचयेदथतिस्रः षट्गजार्कलवविस्तृतिपिंडाः॥४८॥अष्टधा
भक्तस्यक्षेत्रस्ययस्त्र्यंगुलात्मकोभागस्तादृशोः पंचभिर्भागैः भुवंखनेत्उपरित्रिभिस्तादृशो
र्भागैस्तिस्रोमेखलारचयेत्। कीदृशीः षडष्टद्वादशांशाश्चतुस्त्र्यंगुलमितास्तेस्तुल्यंविस्ता
रोच्चयासांताइतिव्याख्या।विश्वकर्मा।व्यासात्त्वातः करःप्रोक्तोनिम्नंतिथ्यंगुलेनतु।उन्नता
सानवांगुलैरिति।क्रियासारे।प्रधानमेखलोत्सेधमुत्तमंचनवांगुलं।तद्वास्यमेखलोत्सेधं
पंचांगुलमितिस्मृतं।तद्वास्यमंगुलोत्सेधमंगुलहितयंक्रमात्।चतुस्त्र्यंगुलव्यासोमेख
लात्रितयस्यतुयोगिनीहृदयेपि।मेखलाःशृणुमेदेवि६हस्तादिषुविशेषतः।षंण्णा गा
कांशसंभागेर्मिताःस्युर्गोपिताःशुभाइति॥४९॥ ॥अथप्रकारांतरेणमेखलालक्षणंना
मिलक्षणंचविपरीतारव्यानकीर्त्तनालिन्या चाह॥रसांशकादुन्नतविस्तृताश्चतिस्रोथ

वैकायुगभागतुल्या॥पंचाथवाषट्शरवेदरामद्यंशोन्नताः स्युर्नवभागपिंडाः॥४९॥आद्यापि
रास्तुरभागहीनाजिनांशकंठाद्धरिवसर्वाः॥कुंडानुसारास्त्रपिमेखलाःस्युरर्कांगभागो
च्चनतास्तुनाभिः॥५०॥कुंडाकारोनाभिरंभोजसाम्योवाज्ञेयंनेनांशहानिर्दलाग्रे॥शेषक्षे
त्रेवह्निरत्नैःसमेतेस्युर्वैकर्णाकेसराःपत्रकाणि॥५१॥ ॥अथवाक्षेत्रषडंशान्नउन्नताःषडंशोने
नविस्तृतास्तिस्रोमेखलाभवंति॥अथैकमेखलापक्षमाह।अथवैकेवमेखलाक्षेत्रचतुर्थां
शोनोच्चाविस्तृतानवस्यात्।अथपंचमेखलापक्षमाह।अथवैकेवपंचमेखलाकार्या॥षट्पं
चचतुस्त्र्यंगुलैःपरिभाषिकैर्विस्तृताः।अथपंचमेखलानमुच्चतामाह।तत्रादिमानव
भागपिंडश्चोच्चंयस्यांसापारिभाषिकनवांगुलोच्चास्यात्।अपरामेखलास्तस्याआद्या
याःयःशरांशःपंचमांशःतेनहीनाभवंति।यथाएकहस्तेकुंडेप्रथममेखलानवांगुलो

च्चा॰अस्याः पंचमांशाः १।६।३।१।५। एष एकद्वित्रिचतुर्गुणा प्रथममेखलामानेन्यूनरूतस
न्तदधस्थानांमेखलानांश्रोच्चंस्यात्। यथेदंद्वितीयमेखलोच्चं।७।१।४।६।३। एवमपरासा
मपिद्रष्टव्यं। मेखलाः सर्वाः क्षेत्रचतुर्विंशतिभागमिताः कुंडान्तर्बहिरेवभवंति। कीदृश्यः
कुंडानुकाराः योन्यादिकुंडेषुयोन्याद्याकाराएवस्युः अपिरेवार्थे॥ अथनाभिलक्षणमाह।
नाभिर्द्वादशांशोनो च्चःषडंशेनविस्तृतःकुंडानुकारः। यादृशंचतुरस्राद्याकारवत्कुंडंतादृ
शोनाभिः। अथवानाभिरंभोजसमःकमलाकारःकार्यः। अयंनाभिः अब्जोपद्मकुंडेन
भवति। तत्रनाभिरूपायाःकर्णिकायाःसत्वात्। अथपद्माकारकरणंनाभिरुच्यते। द
लाग्रेदलाग्रनिमित्तंअंगुलोच्चेचतुरंगुलेविस्तारःयामेनाभेरूनांशद्वादशांशोन्नो
नः कार्यः। शेषमवशिष्टक्षेत्रंतस्मिन्क्षेत्रत्रयसमभागेनकार्यं। तत्रमध्यात्क्षेत्रात्प्रथम ३०

वृत्तंकर्णिकाद्वितीयंवृत्तंकर्णिकास्थानं। तृतीयेपत्राणि। तद्बहिरवशिष्टद्वादशांशेनदलाग्रा
णिरचयेदितिव्याख्या। वासिष्ठमां। प्रथमंमेखलातत्रद्वादशांगुलविस्तृता। चतुर्भिरंगुलैस्त
स्याश्चोन्नतिश्चसमंततः। तस्याश्चोपरिवप्रःस्याच्चतुरंगुलमुन्नतः। अष्टाभिरंगुलैःसम्यक्वि
स्तीर्णस्तुसमंततः। तस्योपरि पुनःकार्योवप्रःसोपित्रतीयकः। चतुरंगुलविस्तीर्णश्चोन्नतश्च त
थाविधः। तथापिंगलामते॥ एकाषडंगुलोत्सेधविस्तारामेखलामतेति। लक्षणसंग्रहेतुविंशोषड
क्तः। चतुरंगुलविस्तारोत्सेधावेकैयमेखलेति। तत्रांतरेषडंशोनाष्टमांशोनमेखलाद्वितयंविदुरि
ति। अयंपक्षोबहुसंमतत्वादुपेक्षितइति। सिद्धांतशेखरेषट्बाणार्चिवह्निनेत्रमिताः स्युःपंच
मेखलाइति। लक्षणसंग्रहेपंचवामेखलाः कार्याः षट्पंचाब्धित्रिपक्षकैः। प्रथमाकुंडसहिता
तरोत्सेधानवांगुलैरिति। पिंगलामते। खाताद्येकांगुलंयुक्तामेखलानांस्थितिर्भवेदिति।

शारदायांकुंडानांयादृशंरूपंमेखलानांचनादृशमिति।तत्रैवकुंडानांकल्पयेदंतनाभिमं
बुजसंनिभंतत्तत्कुंडानुरूपंवामानमस्यनिरूह्यते।मुष्यरत्न्येकहस्तानांनाभिरुत्सेधतार
तानेत्रेवेदांगुलोपेतापद्मनाभिंविवर्जयेदितिप्रागेवलिखितं।अंबुजाकारकरणंतत्रैवा।प
द्मक्षेत्रस्यसंत्याज्यद्वादशांशंबहिःसुधीः।तन्मध्यंविभजेद्दशैस्त्रिभिःसमविभागतः।आद्यं
स्यात्कर्णिकास्थानं केसराणांद्वितीयकं।तृतीयंतत्रपत्राणांमुक्तांशेन दलाग्रकमिति।५१॥
॥अथयोनिलक्षणंस्वयंधरयाह॥ ॥योनिर्व्यासार्धदीर्घावितनिगुणत्रवादायताश्चिद्विभागा
तुंगातावत्समंतात्परिधिरुपरिगातावदग्रेणरम्यं॥निम्नंकुंडंविशंतीवलयदलयुगेनान्विता
धोविशालामूलात्सछिद्रनालांतरवरुचिराश्चत्थपत्राकृतिःसा॥५२॥योनिर्व्यासार्धेन
दीर्घाविस्तारतृतीयांशेनविस्तीर्णाचतुर्विंशांशेनोच्चाचतुर्विंशांशेनपरिधिर्मेखलायस्याः

सातावतैवाग्रेणचतुर्विंशांशेननिम्नंयथास्यात्तथाकुंडंप्रविशंतीवलयदलयुगेनरत्नार्धद्वये
नयुताअधोविशालाअर्थादुपरिस्वल्पसंकोचवतीमूलाभ्यूमूलात्सकाशान्मध्येसछिद्रंनालंय
स्यांसा।पद्मनालाकारत्वान्नालोक्तिः।अंतर्मध्येअवटोगर्तःसुचिघृतधारणार्थंयद्भनेनरुचिरा
सुंदरासाअश्वत्थपत्राकृतिःस्यात्।इतिव्याख्या॥वायवीये।मेखलामध्यतःकुर्यात्पश्चिमेदक्षिणेपि
यां।शोभनामध्यतःकिंचिन्निम्नामुन्मीलितांशनैरितित्रैलोक्यसारे॥दीर्घास्यांगुलायोनिस्त्र्यंशो
नाविस्तरेणतुएकांगुलोच्छ्रितासातुप्रतिष्ठाभ्यंतरेषुच।कुंभद्वयार्धसंयुक्तासाश्वत्थदलवन्नता।
अंगुष्ठमेखलायुक्तामध्येत्वाज्यधृतिस्तथेतिपंचरात्रे॥अर्कांगुलोच्छ्रितांयोनिंविदध्यात्तावदाय
तामितिनावद्दीर्घा।अर्कांगुलोच्छ्रितामित्यस्यविवरणंनवांगुलामेखला।अंगुलद्वयंउच्छ्रायः
क्वचिदुक्तः।अंगुलंपरिधिरितिद्वादशांगुलोच्छ्रायः।अयंप्रायेबहुसंमतःपक्षोनातोस्मदु

रूपकादशांगुलोच्छ्रायपक्षेबहुसंमतःकार्यः।शारदायां।स्थलादारभ्यनालंस्याद्योन्यामध्येसरंध्र
कमिति॥५२॥ ॥द्वादशांगुलपक्षेतुमेखलानांदशांगुलैः॥विस्तृतातिथिभिर्दीर्घांगुलिभिर्योनि
रिष्यते॥५३॥मेखलानांद्वादशांगुलपक्षेदशांगुलैर्विस्तृतातिथ्यं१५गुलैर्दीर्घायोनिःस्यादि
तिव्याख्या॥प्रयोगसारेस्थितांप्रतीच्यांयामेसम्यक्पंचदशांगुलां।द्विपंचांगुलविस्तारांषट्च तु
र्यंगुलांक्रमात्।व्यक्ताश्वत्थदलाकारांनिम्नांकुंडेनिवेशितां।त्रयोदशांगुलोत्सेधांयोनिंकुंडस्य
कारयेत्।केचित्तुयोनिक्षेत्रस्यदीर्घचतुरस्त्ररूपस्ययत्सलंतस्यमूलमानीयतावत्समचतुरस्त्रंसं
साध्ययोनिकुंडवद्योनिंसाधयेदित्याहुः।केचित्तुस्थूलप्रकारेणायथोक्तांयोनिंसाधयेदित्याहुः॥
तत्रप्रकारद्वयमपिविश्वकर्मणादर्शितं।तदत्रविस्तरभयान्नलिखितमिति॥५३॥ ॥अथकुं
डकरणशास्त्रोस्थंडिलंवक्तुमाह॥अथवापिमृदासुवर्णाभासाकरमानंचतुरंगुलोच्चं

३२

मल्पे॥हवनेविदधीतवांगुलोच्चंविबुधःस्थंडिलमेववेदकोणं॥५४॥अथवाल्पेहवनेविबुधः
पंडितःचतुरंगुलोच्चंवाएकांगुलोच्चंहस्तमात्रविस्तारायामंचतुःकोणंस्थंडिलमेवमृदाविदधी
तकुर्यात्।कीदृशयामृदाशोभनोवर्णःपीतरक्तादिःसाभाःकांतिर्यस्याःसामृदित्येतिव्याख्या॥
तत्रांतरेमृदासुवर्णयावापिसूक्ष्मवालुकयापिवा॥अंगुलोच्चंतथावेदांगुलोच्चंस्थंडिलंविदुःच
तुःकोणमुदक्प्राचीप्लवमल्पाहुतोशुभं।पंचांगुलोच्चमथवाद्व्यंगुलसमुन्नतमिति॥५४॥ ॥
॥अथैयंमखस्थितिरमेशतोषायेतिवसंतमालिकयाह॥इतिमंडपकुंडसिद्धिमेतांसुचिरंविहलरी
क्षितोत्यधत्त॥अधिकाशिनगर्युमेशतुष्टेविबुधःशोधयतादिमांविचार्य॥५५॥इतिएवंप्र
कारेणविहलरीक्षितोसुचिरंमनोहरांमंडपकुंडसिद्धिनामग्रंथरचनांकाशिनगरेऽमेशायास्तु
ष्टेहृतवान्।इमांविबुधोविचार्य शोधयतु।अर्थादविचार्यमाशोधयतात्॥५६॥ ॥इति

दिवसमाहुः॥ग्रहाश्चियुगतिथिगण्येयातिशाकेवरेएयविभवग्रहदिरम्येमासिशास्येतपस्ये॥ग्रहा
धरभूतिदर्शेमुष्यपक्षेवलक्षेकमलनयनतिथ्यांभानुमद्वारवर्षा॥५७॥ ॥इतिश्रीसंगमनेर
स्थविमलदीक्षितविरचितास्वरूतमंडपकुंडसिद्ध्याख्यासमाप्ता॥ ॥अथप्राचीसाधनं
श्रीसूर्यसिद्धांतमते॥शिलातलेतुसंशुद्धेवज्रलेपेपिवासमे॥द्वादशांगुलैरिष्टैःसममंडल
मालिखेत्॥१॥तन्मध्येस्थापयेच्छंकुंकल्पमाद्वादशांगुलं॥तच्छायायंविशेद्यत्रतत्पूर्वापर
राङ्मुखोः॥२॥तत्रचिह्नेविधायोभेवृत्तेपूर्वापराभिधो॥तन्मध्येतिमनारेखाकर्तव्याद
क्षिणोत्तरा॥३॥याम्योत्तरदिशोर्मध्येतिमनापूर्वपश्चिमा॥दिङ्मध्यमस्योसंसाध्यवि
दिशास्तद्वदेवहि॥४॥चतुरस्रंबहिःकुर्यात्सूत्रैर्मध्याद्विनिर्गतैः॥भुजःसूत्रांगुलैस्तत्र द
त्तैरिष्टप्रभामता॥५॥प्राक्पश्चिमाश्रितारेखाप्रोच्यतेसममंडलं॥उन्मंडलंचविषुवन्म ३२

डलंपरिकीर्त्यते॥६॥रेखाप्राच्यापरासान्याविषुवद्ग्रागतथा॥इष्टछायाविषुवतोर्मध्यमग्र
भिधीयते॥७॥शंकुछायाकृतियुतेमूलंकर्णस्यवर्गतः॥योदृग्शंकुकृति१४४मूलंछायाग्रशंकु
विपर्ययात्॥८॥सिद्धांतशिरोमणेऽर्कंच॥रत्नेभःसुसमीकृतक्षितिगतेवेदस्थशंकोःक्रमाद्भाग्रं
यत्रविशत्यपेतिचयतस्तत्रापरेद्यो दिशो॥तत्कालापमजीवयोश्चविवराद्भाकर्णमित्याहता
लुंबज्यान्नमितांगुलेरयनदिग्यंद्वीस्फुटाचालिता॥९॥तत्रस्यादथयाम्यसोम्यकुजयोसो
म्याधुवेवाभवेदेकस्मादपिभाग्रतोभुजमितांकोटीमितांशंकुतः॥न्यस्येद्यष्टिमजुंतथाभुवि
यथायष्ट्यायोःस्याद्भुतिः कोटिःप्राच्यपराभवेदितिकृतेबाहुश्चयाम्योत्तरा॥१०॥ दिङ्
सूत्रसंपातगतश्चशंकोश्छायाग्रपूर्वापरसूत्रमध्यांतरोदोःप्रभावर्गवियोगमूलंकोटीर्नरा त्यागत
यतनःस्यात्॥११॥ ॥इदंपुस्तकंथालिशोधभट्टस्य॥शके१७०४शुभकृन्नामसंवत्सरेसमासेलिखितं॥७

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

कुं.सिं.टी.
३४

1039

॥इतिकुंडसिद्धिटीकासमाप्ता॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

राम
३४